प्रपंचस्य २ क्ष्यते भ्रममिति द्व्यस्य वा नाद्यः प्रपंचप्रमां प्रतींद्रियाणां कारणत्वग्राहकप्रमाणस्याविज्ञमतान्वयव्यतिरेकादेरनुपपत्तेः द्वितीयप्रमाणं वा
ते भ्रममिति द्वानुवादपक्षे इंद्रियाणां प्रपंचविषयप्रमाकारणत्वेन प्रमाणमिति स्यार्थः प्रमामात्रे इंद्रियाणां कारणत्वमिति स्याद्यः पक्षः प्र
अन्योन्याश्रयत्वात् ६ माकरणत्वस्य दुर्ग्रहत्वात् प्रमाकरणत्वा ज्ञानावाचिन संभवतीत्युक्तं तत एव प्रमाकरणत्वाभावादेव ज्ञानमात्रे इंद्रियाणां कारणतेति अवाधितत्वसाधिहेतुः ६
द्वितीयः पक्षोपि निरस्तः इत्यतिदिशति एतेनेति भ्रममात्रे इंद्रियादीनां कारणतेति तृतीयपक्षमुपपादयति अस्तु तर्हीति किमेतदेक
देशिनां चोद्यं तत्र नैयायिकादीनां नोभयथापि इति प्रतिजानीते देति एकदेशिनिराकरणाय हेतुमाह भ्रमज्ञानस्येति श्रुतत्वात्प्रसक्ता
नैयायिकादिचोद्य २ दि प्रमाणाविद्याकारणत्वमावानावात्स्वामिस्तत्रस्यार्थः द्वितीयनिराकरणे हेतुमाह ज्ञानेप्रतीति इंद्रियाणां भ्रमं प्रति कारणत्व
ग्राहकं प्रमाणमन्वयव्यतिरेको वा अन्यत्वा नान्वयव्यतिरेको स्वप्ने इंद्रियवृत्तेरभावेपि इंद्रियान्वयव्यतिरेकदर्शनेन तयोरप्रमा अन्वयव्यतिरेकयो १

णत्वान्नयेव श्रुत्येंद्रियाणां प्रपंचविषयत्वं दर्शितमिति वाच्यं स्वप्नेंद्रियवदन्वयव्यतिरेकभ्रमसिद्धप्रपंचज्ञानकारणत्वानुवादेनात्म
न इंद्रियाविषयत्वप्रदर्शने तात्पर्यात् एतेन भ्रमप्रमासाधारणज्ञानकारणत्वमप्यपास्तं प्रमाकारणत्वस्य निरूपयितुमशक्यत्वात् अ
स्तु तर्हि भ्रममात्रे कारणतेंद्रियाणां न भ्रमज्ञानस्याविद्यामात्रयोनित्वस्य श्रुतत्वात् ज्ञानं प्रतींद्रियान्वयव्यतिरेकयोः स्व
प्नेंद्रियान्वयव्यतिरेकवदुपपत्तेः

एतेन कारणत्वग्राहकत्वान्येतरः तस्यानुपलब्धेरिति निरूपोपलब्धिः करणसाध्या क्रियात्वात् छि
दिक्रियावदित्याद्यनुमानानि चक्षुरादीनां प्रपंचात्मकरूपाद्युपलब्धिं प्रति कारणत्वग्राहकाणीति चेन्न उपलब्धिपदेन किं स्फुरणं
चित्स्वरूपस्य ३ चित्स्वरूपं श्रुतममुच्यते उत वृत्तिः वृत्त्युपहितं वा नाद्यः तस्या नित्यं विज्ञानमिति श्रुतेर्नित्यत्वे कारणत्वानपेक्षणात् द्वितीयेपि सा किम वृत्तिर्न संस्य अकरणिका
करणिकेव पक्षः उत चक्षुरादिकरणा चक्षुः करणिका वा न प्रथम द्वितीयो बाधितत्वात् आत्मा अमात्याश्रयात् चक्षुः करणक इष्टोसिद्धाया इति पक्षे करणा
चक्षुष्करणक नेन पक्षः कानुमानप्रवृत्तिः प्रवृत्ते चानुमाने चक्षुः करणकवृत्तिसिद्धिरिति अत एव न तृतीयपक्षोपि न चावधीरितावि कल्पमुपल प्रतिपादनस्य
वृत्तिः ५ ब्धिमात्रं पक्षः तस्मादपि दृष्टस्तु पश्यत्योम नसावि जानातीति मनसो विद्याया अन्यास्तरत्वात् मनसः स्वातंत्र्येण बहिः प्रवृत्तेः श्रुति वैयर्थ्यात् द्वि
गंधादिग्राहक सिद्धत्वात् इमं चक्षुर्न रूपस्य तदाश्रयद्रव्यस्य वा ग्राहकं असाधारणेंद्रियत्वात् घ्राणादिवदिति प्रयोगात् एतेन घ्राणादीनां गंधादि तीयपक्षे चक्षु
त्वेन संभवती ग्राहकत्वं व्याख्यातं तेन च मनोपि करणं त किमात्मोपलब्धिं प्रति करणमुत सुखाद्युपलब्धिं प्रति करणं नाद्यः कर्तृकर्मविरोधात् स्वप्रका ष्करणप्रतिपा
तिव्याख्याता ३ शत्वाच्च न द्वितीयः सुखादेः साक्षिवेद्यत्वात् तस्मादविद्या मतैव जगदुपलब्धिरिति कुत इंद्रियाणां प्रमाणतेति च शब्दप्रयुज्यते स्पष्टा वः दनस्यैव यथा न ४

तस्यादीनि वापाठः ४ अन्योन्याश्रयदोषादेव ५ एवं सवेके इति कृतत्व ५ चक्षुषः रूपादिग्राहक
सो पत्ते स्थापन ... त्वनिरासेन न
प विषय व ... ५ २

सि०बु०
२२
घटादिका
र्यं ३
मृदादि ६

नन्वविद्योपादानस्य जगतो देरविद्यावृत्तिग्राह्यत्वं युज्यते घटादिजगतु नाविद्योपादानं घटाद्यर्थिनां मृदादिकारणविशेषाद्यानयनद
र्शनेनान्वयव्यतिरेकसिद्धमृदाद्युपादानकत्वात् ततः कथमविद्यावृत्तिभास्यता घटादिप्रपंचस्येति तत्राह एवमिति घटादिस्थितावं
कार्यमध्यमपरिमाणत्वाद् व्यतिरेके आत्मवत् तत्र भावरूपं निःप्रतियोगिकत्वात् एवं सर्वस्मिन्नभावकार्ये उपादानकारणाकां
क्षायां आत्मनोऽसंगत्वेनाकारणत्वात् अविद्यैव कारणत्वेन कल्पनीयेत्यर्थः घटादेरविद्योपादानत्वे घटाद्यर्थिनां मृदाद्युपादान
दर्शनेन घटादीन् प्रति मृदाद्युपादानकत्वं व्याहन्येत इति नेत्याह तत्तदर्थिनामिति आविद्यकत्वमेव तथैव स्युच्यते तथा च मृदाद्या
कारेणाविद्याया एव परिणतत्वात् तदुपादानेन मृदादेर्घटादीन् प्रति कारणत्वकल्पना आविद्यकत्वाविरोधिनीत्यर्थः तत्र दृष्टांतमाह
स्वप्नवदिति यथा स्वप्ने वस्तुतो घटो वा मृद्वा नास्ति किं त्वविद्यैव मृद्रूपतां प्राप्य आविद्यकं कुलालोपात्तघटादिकमपि तावद्दृश्यमेवा आविद्यकमेव २
रभते न तत्र रथा इत्यादिश्रुत्या वास्तवस्य तस्य निषिद्धत्वात् तथा जाग्रत्कालेऽपि नेह नानास्ति किंचन इत्यादिश्रुत्या घटादेः प्रपंचस्य निषिद्धत्वात्

एवं घटपटादिकार्यमात्रे कारणाकांक्षायां कारणत्वेनाविद्यैवोपसंहर्तव्या तत्तदर्थिनां तत्तत्कारणविशेषोपादानं तु तथैव स्वप्नवत्तदुपपा
दनीयं ततो बुद्धादिरिक्तं कृत्स्नं कार्यजातं ज्ञानज्ञेयरूपं तत्सर्वं आविद्यकमेवेति प्रातीतिकमेव सत्त्वं सर्वस्येति सिद्धं तदुक्तं अविद्या
यो न यो भावाः सर्वेऽमी बुद्बुदा इव क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयं

मायां त्वेति श्रुत्या मायाया जगदुपादानत्वश्रुतेर्मृदाद्या
कारपरिणताविद्यैव घटादेरुपादानमिति न किंचिदपि विरुध्यत इत्यर्थः अवांतरप्रमेयमुपसंहरति तत इति उक्तयुक्तित इत्यर्थः
प्रपंचस्य तत्स्फूर्तेश्चाविद्यकत्वोपपादनफलं प्रपंचस्य ज्ञातसत्त्वमुपसंहरति प्रातीतिकमिति ज्ञानज्ञेययोराविद्यकत्वात् ज्ञा
नकालीनैव तयोः सत्ता न ज्ञानात्प्राक् नोत्तरमिति ज्ञानस्थितिसमा तिष्ठति ज्ञाननिवृत्त्या निवर्तते प्रपंच इति ज्ञात एव सन्
प्रपंच इत्युक्तं तत्र वसिष्ठवाक्यं संवादयति तदुक्तमिति भावा ज्ञानज्ञेयरूपाः प्रतिज्ञानं प्रपंचनेदं संवादयति क्ष
णमुद्भूय गच्छंतीति अविद्याकारणत्वेनोपसंहर्तव्येत्युक्तं

भ्रमाच्चेत्तर्हि विषयबाधेऽपि भ्रमत्वं तथा च कार्यकारणभावा(स्य) विषयस्य बाधे चेति कार्यकारणभावो नास्तीति कथम् अविद्यायाः कारणत्वमिति स एव दोषः २ सिद्धांतिनाः

ननु तत्त्वदर्शिनां तत्र कारणविशेषोपादानं स्वप्नवदुपपादनीयमिति वदतां मृद्घटादीनां कार्यकारणभाव एवं नेष्यते इष्यते वा आद्ये शंकते मृदादीनामिति तत्र दूषणं संभावयति अविद्याया इति कार्यकारणभावस्य काल्पनिकत्वे अविद्यापि कारणं कथं स्यादित्यर्थः इष्यते चेत् तर्हि स कार्यकारणभावो मृद्घटादीनां प्रमाणात् भ्रमाद्वा न भ्रमात् विषयबाधेऽपि भ्रमत्वं तथा च पूर्वोक्त एव दोषः अथ प्रमाणात् तर्हि घटादीनामस्त्वविद्याकारणं कारणताग्राहकप्रमाणस्य मृदादिविषयत्वेनाविद्याविषयत्वाभावादिति विशेषमाह प्रमां विनेति स्वपक्षं चाचष्टे र नत्वेति अविद्यायोनित्वं कथमित्यत्र कार्यकारणभावस्याभंगीकारादिति विशेषः यथायथमिति यथायोग्यमन्वयव्यतिरेकादीत्यादिपदं ध र्मिग्राहकमानपरं तत्र प्रसक्तानां मृद्घटादीनामन्वयव्यतिरेकाभ्यां पृष्ठाकापृष्ठाभ्यां धर्मिग्राहकमानात् कार्यकारणभावो यथायोग्यं गृह्यते इत्यर्थः नत्वेति कार्यकारणभावे अभंगीकारवादस्य दर्शनादित्यर्थः न वस्तु मृद्घटादावन्वयव्यतिरेकादिप्रमाणसिद्धो कार्यकारणतास्तु ततः किं

मृदादीनां कारणत्वं न चेदिष्टं घटं प्रति अविद्यायाः कारणत्वं कथं सिद्ध्येत् प्रमां विना १५ नत्वविद्यायोनित्वं भावानां कार्यकारणभावमंगीकुर्वन् वा न चेदविद्यायोनित्वमपि कथं अस्ति चेत्कार्यकारणभावः तदा यथायथमन्वयव्यतिरेकादिरेव प्रमाणं तत्र पुरुषान्तरसंचारात् तथा चान्वयव्यतिरेकादिसिद्धमृदादिकारणत्वमपहायाविद्याकारणत्वाभिधानमनुचितमेव किंचाविद्यायोनित्वं च भावानाव रन् पुष्ट्यः किमितरनिरपेक्षाया अविद्याया एव कारणत्वं उतादृष्टेष्टमृदादिकारणान्तरसापेक्षाया नाद्यः कारणवैचित्र्याभावेन कार्यवैचित्र्यानुपपत्तेः

च

स्यादिति तत्राह तथा चेति किं कारणत्वेनाविद्यैवोपसंहृत्येऽस्मिन्नेवकारोऽविद्यातोऽन्यत्र मृदादेः कारणत्वयोगं व्यवच्छिनत्ति अविद्यायां कारणत्वायोगं वा नोभयथापि संभवतीति दूषणं तदाह किं चेति इतरनिरपेक्षेति मृद्दण्डकुलालादृष्टेश्वरादिनिरपेक्षेत्यर्थः अयोगव्यवच्छेदपक्षमाह उतेति अदृष्टेश्वरादीत्यत्रादिपदेन मृदादिकारणान्तरग्रहः अन्ययोगव्यवच्छेदपक्षमादिमं निराचष्टे नाद्य इति हेतुमाह कार्येति अविद्यैव चेत्कारणं कार्यं वियदादिप्रपंचलक्षणं विचित्रं नानारूपं न स्यात्तत्र हेतुः कारणेति एकस्मादविचित्रादनेकं कार्यं न स्यात् सामग्रीभेदस्य कार्यभेदप्रयोजकत्वादित्यर्थः

सि०मु० २२ किंच कारणत्वेन स्वीक्रियमाणाविद्या न तावच्चेतनाऽविद्यात्वङ्गतेः अचेतनाचेतनाधिष्ठिता स्वयमेव प्रवर्त्तते चेतनाधिष्ठिता वा न तावच्चेत
नाधिष्ठिता चेतनस्यापि तदधिष्ठातृत्वेन कारणत्वप्रसक्तौ अविद्यामात्रकारणवादक्षतेः तस्माच्चेतनानधिष्ठिता स्वयमेव कार्यकारण
यप्रवर्त्तत इति वाच्यं तत्र दूषयति चेतनेति प्रवृत्तित्वेन पारतंत्र्यमाह जडप्रवृत्तिरिति कारणांतरसापेक्षेति पक्षं दूषयति नापर इति कार्यस्य
घटादेः निमित्तत्वेनादृष्टेश्वरादिरुपादानापेक्षाया अदृष्टादिनापूरणात् किमविद्ययेत्यभिप्रायेण नापर इत्यत्र हेतुमाह अविद्येति
अविद्यापि ५ न त्वदृष्टादिवदविद्या या अपि प्रमाणसिद्धत्वात् सापि किं न कारणमिति तत्राह कल्पितेनेति अस्मदादिप्रतीतेर्ज्ञानाज्ञानाविषयत
याप्युपपत्तेर्नाविद्याप्रमाणवतीत्यर्थः ननु वेदांतप्रामाण्याय भावानामविद्यायोनित्वं वाच्यमिति तत्राह तथा चेति भावानामवि
द्यायोनित्वाभावे सतीत्यर्थः घटपटादेरविद्यकत्वे मिथ्यार्थविषयलौकिकप्रमाणस्य प्रवृत्तिरजतज्ञानवत्प्रामाण्यं न स्यात् स्वर्गादि
स्वर्गयागादि १ यागादीनां चाविद्यकत्वे तेषां संबंधस्य साध्यसाधनलक्षणस्याप्यविद्यकत्वात् तद्विषयपूर्वकांडस्य प्रामाण्यं न स्यात् भावानामनाविद्यक

चेतनाधिष्ठानमंतरेण जडप्रवृत्तेः कार्यकारित्वानुपपत्तेश्च नापरः अविद्याकारणवादिनाप्यदृष्टेश्वरादेः कारणत्वस्यावश्यं परक्रव्यत्वा
अदृष्टेश्वरादे रेव २ त्तलाघवात्तैरेव विचित्रकार्योपपत्तौ किमज्ञानेन कारणत्वाभिमतेन कल्पितेन तथा च प्रत्यक्षादेर्लौकिकस्य प्रमाणस्य पूर्वकां
डस्य च पुत्रपशुस्वर्गादिकं प्रति यागादेः साधनताबोधकस्य प्रामाण्यं समर्थितं भवति अन्यथा लोकवेदविरुद्धः कं पक्षमवलंबेत
तस्मादविद्यामात्रकारणकं जगदिति सिद्धमात्र अत्र वदामः

त्वे तु स्यादेव लौकिकवैदिकप्रामाण्यं इति भावानामनाविद्यकत्वमे
व युक्तमित्यर्थः मास्तु तेषां प्रामाण्यमिति तत्राह अन्यथेति न तावदयमाविद्यकजगत्वादी वैदिकः पूर्वकांडप्रामाण्यस्वीकारा
त्तनापि बौद्धः प्रत्यक्षाद्यप्रमाणवादित्वात् तत एतौ न पक्षौ दृष्ट्वा कं पक्षमवलंबतामित्यर्थः न च प्रपंचस्यानाविद्यकत्वे वेदापार
मार्थ्यप्रामाण्यं ज्ञापार्थत्वेन प्रामाण्योपपत्तेरिति यस्मात्केचिदनुपपत्ति येन चाविद्या जडा प्रवृत्तिर्यत्नश्च प्रत्यक्षादिप्रामाण्य
ततो भावानामविद्यामात्रयोनित्वं न युक्तमित्युपसंहरति तस्मादिति सिद्धांतयति अत्रेति यदुक्तं मृदादिकारणत्वमपहायावि
द्याकारणत्वाभिधानमनुचितमिति तत्राभिमतपूर्वपक्षे अविद्याकारणत्वाभिधानस्यौचित्यं सिद्धांतं वदाम इत्यर्थः

अविद्यायाः कारणत्वं कथं मिथ्यात्वमित्यपेक्षायां क्रमभ्रमाह यथेति कार्यं किं निर्वचनार्हमुत तन्न यदि निर्वचनार्हं तत्किमात्मवत्सत्वेन उत शशवि
षाणवदसत्वेन नोभयथापि निर्वचनार्हं नात्कार्यत्वव्याघातादित्याह सतस्तावत्स्वसत्तासंबंधो हि जनिः न च स्वसंबंधवति सति सत्तासंबंधापेक्षावैयर्थ्यादित्यर्थः
उत्पत्तिमाह कार्यं न चेत्स्वसत्तामनुत्पत्तिमत्ततः प्रपंचस्य सत्वेनैव निर्वचने कार्यत्वं न स्यादित्यर्थः एवं सत्वस्योत्पत्तिं निरस्य तद्दृष्टान्तेनासतोपि तां निर उत्पत्तिं ३
स्यति एवमिति स्वसत्तासमवायः स्वकारणसंसर्गो वा जनिः न चासतः संबंधाश्रयत्वं संबंधनिरूपकत्वं वा संभवति हि इष्टत्वात् ततः प्रपंचस्यासत्वेन निर्वचने
असत्वेन ५ उत्पत्तिमत्वासंभवे कार्यत्वव्याघातेनैव न निर्वचनार्हत इत्यर्थः अस्तु तर्हि सत्वासत्वाभ्यां प्रपंचस्य निर्वचनार्हतेति एतत् किमेककालेऽन्यमन्यं भिन्नकाल
सत्वासत्वयोः ६ वा नाद्यः विरोधान्न द्वितीयः सत्वासत्वयोः कालोपाधिकत्वप्रसंगेनास्वाभाविकत्वप्रसंगात् कालभेदेनैव वस्तुनो द्वैरूप्यासंभवाच्च ततः सदसत्त्वो
जनिर्नैवेत्य पि न युक्तिमानिति च कारार्थः निर्वचनार्हं सदसद्विलक्षणं कार्यमस्तु तथा च न पूर्वोक्तदोषप्रसंग इति पक्षं द्वितीयपक्षं तत्त्रनेत्यत्रोक्तस्मिन्नपि
त्रस्यास्य ७ ह्रेयप्रपंचस्य सत्वोपादानत्वानुपपत्तेः कार्यकारणयोर्वैलक्षण्यादर्शनात् योग्यायोग्येन संबध्यते इति न्यायेन चानिर्वचनीयमेव कारणमुक्तमि
अविद्यायाः २ व चाविद्येत्यविद्योपादानत्वप्रपंचस्य कार्यत्वमेव कल्पयतीति तत्कारणत्वाभिधानमुचितमित्याह न स्यात्त्वमेवेति श्लोकं व्याकर्तुं कार्यस्वरूपं
मुक्तानिर्वचनीयः १ विमृशति किमिति कार्यं निर्वचनीयमिति किं पाठार्थः निर्वचनीयपक्षं द्विधा विकल्पयति सत्यमित्यादिना सत्वासत्वप्रकल्पस्य विरोधादनुपन्यासः का

दन

पथासतो जनिर्नैव मसतोपि जनिर्न च जन्यत्वमेव जन्यस्य मायिकत्वसमर्पकं १६ किमिदं कार्यं सत्यमसत्यं वानाद्यः एकमेवाद्वितीयमिति श्रुतेतमा
त्रपर्यवसितागमविरोधात् अनुपपत्तेश्च तथा हि किमुत्पत्तेः पूर्वं कार्यं सत्सदुत असच्चेन्नाहि शशविषाणमपि कारणव्यापाराज्जायेत असत्वाविशेषात्

मा मा३

र्थमसंपादार्थं कं यत्नात्मसंपदुत्थमिति विकल्प्यार्थः पारमार्थिकत्वपक्षं दूषयति एकमेवेति एवकारः स्वगतभेदनिरासार्थः तथा च सजातीयविजा
तीयस्वगतभेदशून्याद्वैतमात्रे उपक्रमोपसंहारादिना पर्यवसितागमविरोधान्न कार्यं पारमार्थिकमित्यर्थः ननु मृत्तिकेत्येव सत्यमिति श्रु
मृत्तिकेत्येव सत्यमित्यागमस्य २ तं च सत्यत्वप्रतिपादकोप्यागमोस्तीति कथमसत्यत्वं प्रपंचस्येति चेत् सत्यं तस्य पूर्वोक्तश्रुत्या च स्वार्थानुपपत्तिलक्षणतर्कसनाथ
यावत्त्वस्याविरोधेनान्यपरत्वादित्यभिप्रेत्य प्रपंचसत्यत्वेऽनुपपत्तिमाह अनुपपत्तेश्चेति प्रतिज्ञातामनुपपत्तिं प्रतिपादयति तथा हीति
नियमानुपपत्तिर्भवति तथा प्रतिपाद्यत इत्यर्थः पारमार्थिकत्वपक्षे घटादेः कार्यत्वानुपपत्तिं वक्तुं विकल्पयति किमित्यादिना अत्र
सत्यपक्षमनन्यनिराकुर्वन् द्वितीयं पक्षं व्याचष्टे असच्चेदिति स्वकारणसंबंधनिरूपकत्वं स्वसत्तासमवायाश्रयत्वमसतो ज
नि प्रागस्ति वाथ मस्ति न वा नास्ति चेत्कथमसज्जायते अस्ति चेत्तदा दूषयति नहीति ननु कथं शशविषाणं जायते तत्सामग्र्यभावादिति
तत्राह कारणव्यापारादिति असतो घटादेर्या सामग्री सैव शशशृंगस्यापीति तदपि जायेतामित्यर्थः ननु असतो घटसामग्री कथं श
शशृंगसामग्री तयोर्भेदादिति तत्राह असत्वेति भेदधर्मित्वे सत्त्वप्रसक्तेर्नासतो घटः शशशृंगात्तु भेदमर्हतीति तत्सामग्र्येव शश

अभिव्यक्तिविसमसमवायाद् इति विकल्पं दूषयति आद्ये किं कारणव्यापारेण कार्यत्वव्याघातात् द्वितीये पूर्वं विषाणमपि कारणव्यापाराद् अभिव्यज्येत असत्त्वाविशेषात् १ मू०

सि०मु० २४

ननु नासत्तत्सत्कार्यं किंतु प्रागेवासदिति कथं तत्कारणादिसंबद्धमिति चेन्न असतः शशविषाणयोगात् योगे वा शशविषाणेऽपि तथा स्यादिति
आद्यमनुवदति सद्वेति कारणव्यापारवैयर्थ्यापत्त्या दूषयति किं कारणेति कारणव्यापारो हि कार्यसत्त्वाय तच्चेत्तत्कार्यं कारणव्यापारात्प्रा
गेव सत् किं कारणव्यापारेण सतो हि पुनः सत्त्वसंपादयितुमशक्यत्वादित्यर्थः न केवलं कारणव्यापारवैयर्थ्यं सत्कार्यपक्षे किं तु घटा
देः कार्यत्वमपि न स्यादिति हेत्वंतरमाह कार्यत्वेति नियतपश्चाद्भावित्वस्य कार्यत्वात् पूर्वमपि तस्य सत्त्वे पश्चाद्भावित्वलक्षणविशेष कार्यसत्त्व ४
णाभावात् कार्यत्वव्याहतमेतेत्यर्थः एतेनाद्यचरणो व्याख्यातः कारणव्यापारसाफल्यकत्वायपूर्वकृते अभिव्यक्तौ ति कार्यस्यासत्तो जन्मेर
नुपपत्तेरसत्त्वं तु उक्तमिति पक्षो यदि द्वितीयो निरस्तो वेदितव्यः अनिर्वचनीयपक्षमुत्थापयति अस्तु तर्हीति अनिर्वचनीयत्वं कुतस्त्या
पांकद्य हेतुगर्भं विशेषणमाह सदसद्भ्यामिति पूर्वोक्तयुक्त्या इत्यर्थः तर्हि मायोपादानत्वं सिद्धमित्याह एवं चेदिति कार्यानुरूपं कार्यसदृ
शमित्यर्थः सादृश्यमुपपादयितुमनिर्वचनीयस्य ज्ञानविशेषणं अज्ञानस्यासादिलेत यथाविक्षेपादानां तरप्रसक्तं वारयति अनादीति अनिर्वच नीय २
कार्यानुरूपमिति विशेषणस्वचितं हेतुमाह सत्त्वसत्त्वेति विलक्षणत्वादित्यर्थः वेलक्षण्येपि कार्यकारणभावः किं न स्यात् दृश्यते हि
नेदं सत्त्वमिति वा धकालेपि शुक्तिप्रवाद २ सत्याच्छुक्तीरजताद्देरसत्यस्य कारणमिति तत्राह लोक इति शुक्तिरूपज्ञानमेव रजतादेः कारणं न शुक्तिर्बाधकालेपि कार्यप्रसक्तेरिति
अनिसक्ता चेदिति मू

सत्त्वेत् किं कारणव्यापारेण पूर्वमपि तस्य सत्त्वात् कार्यत्वव्याघातात् अभिव्यक्तिमात्रं कारणव्यापाराज्जायत इति चेन्न तत्रापि सत्त्वासत्त्व
विकल्पग्रासत्वात् मायापाद्यात् अस्तु तर्हि सदसद्विलक्षणमनिर्वचनीयमेव कार्यं एवं चेत्तर्हि कार्यानुरूपानाद्यनिर्वचनीयाज्ञानमेव
कारणमुचितं सत्त्वस्यासत्त्वहेतुत्वानुपपत्तेः लोके तथादर्शनात् न च कार्यवैचित्र्यानुपपत्तिः विचित्रशक्तिकस्येवाज्ञानस्य कल्पना
दित्युक्तं न च पूर्वकांडस्याप्रामाण्यानुपपत्तिः

थः यदुक्तं पूर्वपक्षे कारणवैचित्र्याभावे कार्यवैचित्र्यं न स्यादिति तद्दूषयति नेति
उक्तमिति विचित्रशक्तिकमेकमज्ञानमाश्रयविशेषाभावेऽपीति युक्तमित्यत्र न चाविद्यैव कारणमिति पक्षे चेतनाधिष्ठानमंतरेण जडस्य
क्ते कार्यकारित्वानुपपत्तिरिति वाच्यं अविशिष्टत्वं नाम चेतनोऽविद्यां तथापि माविद्यामात्रोपादानत्वं शर्वेमाविरुद्धत्वेन तस्य भिन्नत्वात् चेतनस्य २
चेतनगताविद्याधिष्ठानत्वस्याप्यविद्यालक्षणाधिष्टेयमावेक्ष्य नाविद्यकुत्वाद्विद्यामात्रकारणत्वाहानात नादृष्टादिसापेक्षा
विद्याकार्यकरणेति शिपक्षे लाघवाददृष्टादिकमेव कारणमस्तु किमविद्ययेति निरस्तं अदृष्टादेरविद्यकत्वेन तत्कारणत्वेनाविद्या
या एव कारणत्वात् एतेन मृदादीनां घटाद्युपादानकत्वात्किमविद्ययेति परास्तं मृदाद्याकारपरिणताया अविद्याया एव तत्रोपादानत्वा
त् तस्मादाविद्यक एव प्रपंच इति निरवद्यं मिथ्याप्रपंचविषयत्वेऽपि सत्कार्ये लौकिकप्रमाणस्य मिथ्यात्वे तत्स्वर्गयागसाध्यसाधनभावग्रा
हकत्वे पूर्वकांडस्य च प्रमाण्यानुपपत्तिरित्याशंक्याह न चेति लौकिकप्रत्यक्षादेः कृत युक्त्या अप्रमाणत्वादेव प्रामाण्यानुपपत्तिर्न दो

[illegible]

कुतः प्रामाण्योपपत्तिस्तत्राह तस्यापीति अयमर्थः पूर्वकांडं किं स्वर्गयागयोः साध्यसाधनमात्रे पर्यवसन्नं उत तत्स्तुतिपारंपर्यद्वारे
णा ब्रह्मण्येव पर्यवसन्नं नाद्यः अध्ययनविधिविरोधात् तथा हि अध्ययनविधिर्हि प्रयोजनवदर्थज्ञानोद्देशेनाध्ययनं विधत्ते न च स्वर्गयागयोः साध्य
यागस्य पूर्योत्तनवत्तास्वर्गादेः स्वयित्वेन प्रयोजनतासत्त्वात् तत्साधनयागस्य पारमार्थिकप्रयोजनसाधनत्वानुपपत्तेः तोदृगर्थ साधनमात्र २
मात्रेपरत्वे पूर्वकांडस्याचमानेकथंनाध्ययनविधिविरोधः न ह्यध्ययनविधिस्त्रैवर्णिकान्प्रतारयति तस्मात्साध्यसाधनमात्रपूर्वकां
प व डस्पर्यवमानमिति रिक्तं वचः द्वितीयेनप्रामाण्यानुपपत्तिः इत्यभिप्रायेणाह तस्येति तस्य पूर्वकांडस्य ब्रह्मण्येवतात्पर्यात्तन्नप्रमाण्या
नुपपत्तिरिति पूर्वेणान्वयः ननु पूर्वकांडात् तद्ब्रह्मप्रतीतेः कथं तत्परत्वमिति तत्राह साध्येति मुखेनद्वारेणेत्यर्थः पूर्वकांडं हि साध्यसाधनमा बृहद
साध्यसाधनमात्र २ वं स्वर्गयागादेर्बोधयतितद्बोधनाच्च पुमान्कर्माण्यनुतिष्ठति अनुष्ठितानि च कर्माणि ब्रह्मज्ञानसाधयंतीति तादृक्कर्मबोधकपूर्वकां ब्रह्मज्ञान साध कं ३
डस्य ब्रह्मपरतापरंपरयायुज्यत इत्यर्थः ननु उपनिषदामेव तादृक्ज्ञानसाधनत्वात्तेन तादृक्ज्ञानं प्रतिकर्मणां साधनतेति तत्राह सत्त्व
शुद्धिद्वारेणेति सत्त्वशुद्धिर्हि तावत्तज्ज्ञानांगं ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यागमात् सत्त्वशुद्धिः कर्मभिः कषायेकर्मभिः पक्वे ततो ज्ञानं प्र
ब्रह्मज्ञान २

तस्यापि साध्यसाधनभावमुखेन सत्त्वशुद्धिद्वारेण प्रवृत्तिद्वारेण वा ब्रह्मण्येव तात्पर्यात्

वर्तते इत्यागमात् तत्पश्चात् करणशुद्धिद्वारा कर्मणां ज्ञानोपयोग इति तद्बोधकपूर्वकांडस्य ब्रह्मपरतेति भावः नन्वफलत्वान्नित्यकर्मणां न तत्सत्त्वशुद्धि
हेतुता काम्यकार्मणां तु फलांतरावबोधात्कथं शुद्धयर्थतेति न कर्माणि पित्र्लोक इति श्रुतेः नित्यानामफलत्वासिद्धेः संयोगपृथक्त्वन्यायाच्च सत्त्वसंस्का
अग्निहोत्रं जुहोती त्यादिविधिवाक्यं २ अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यधिकारविधिः ४ रार्थत्वाविरोधात् विविदिषापक्षमाश्रित्य वा परिहरति प्रवृत्तिद्वारेणवेति अयमर्थः उत्पत्तिवाक्यविहितानि तावत्कर्माणि तेषां च फलाकांक्षा वस्था या यज्ञेन विवि दिषंतीतिवा क्यस्य ३
मधिकारविधयं तरप्रवृत्तिवत् यज्ञेनेत्यादिफलविधायकवाक्यप्रवृत्तेस्तस्य च ब्रह्मानुभवकामो यागादि इत्यनुतिष्ठेदिति सर्थः कृत्वा कर्मणामविप्र
षेणात्वानुभवसाधनत्वप्रतीतेः मा कृत कर्मसाध्यत्वस्य ज्ञाने वाधादं गाव तरण न्यायेन ज्ञानसाधनश्रवणादिप्रवृत्तिद्वारकर्मणां ब्रह्मज्ञानार्थत्वाद
गमात् तादृक्कर्मबोधकवेदराशेः पूर्वकांडस्य युज्यते ब्रह्मपरतेति कथं तदप्रामाण्यमिति
पुरा

फलवत्सन्निधावफलं तदंगं इत्यंगाव तरणन्याय इत्यर्थः २
अनर्थकान्तरंगेषु यथा पंचदशारत्निः सप्तदशारत्निः वाजपेययूपः इत्यनेन विधिना विधीयमानं साप्तदश्यमतस्य मानं तदंगे ऽवतरति इति न्यायेन इदमपि बोध्यं यदि प्रधानस्तानेन विधिरनर्थकं तर्हि तदंगश्रवणादावतरतीति २
प्राधान्ये विवेशः ३

एकस्य तूभयत्वे ऽसंयोगपृथक्त्वं यथा खादिरे पशुं बध्नातीति श्रुतेः खादिरं वीर्यकामो यूपं कुर्यादिति च श्रुतेः खादिरत्वं यूपेगुणो विधीयते वीर्यकामस्य च वीर्यफलमिति फलत्वावेसंबंधः खादि रो यूपः सोमयागे विहितः इति तस्य सोमयागकर्मांगत्व विधी प्रतिपूयाख्यफलदानत्वं वे दे खादिरयूपस्य वीर्यं तिप्रयायाख्यफलदातृत्वस्योक्तत्वात् खादिरो यूपः सोमयागे विहितः इति तस्य सोमयागे नियतं वीर्यमिति पृथग्याख्यफलदानत्वं काम्यत्वमपि इति संयोगपृथक्त्वं २॥

सि॰मु॰ २५

ननु भवतु ब्रह्मणि पूर्वकांडस्य तात्पर्यं तथापि तत्र प्रामाण्यं कुत इत्यत्राह तात्पर्येति यत्परः शब्दः स शब्दार्थः इति न्यायादित्यर्थः जगतोऽज्ञानमूलकत्वे
यतो न कोऽपि दोषः प्रसरति तस्मादित्युपसंहरति तस्मादिति अविद्यकत्वसाधनस्य जगतः प्रातीतिकसत्वसाधनोपयोगमाह अतइति अविद्याहिज्ञा
णिकर्मवशात्सुखदुःखासक्ती जगदाकारेण तत्प्रतीत्याकारेण च युगपदेव परिणमते नियामकाभावात् क्रमपरिणामे प्रयोजनाभावाच्च इतरेऽश्च विषयज
न्यत्वानंगीकारात् आकारार्पकत्वस्याजनकत्वेऽप्युपपत्तेः ततः प्रतीतिसमकालीनमेव विषयसत्वमुचितमित्यर्थः विमतः प्रपंचः प्रतीतिमात्रकालीनः
अविद्योपादानत्वात् रज्जुसर्पादिवदित्यभिप्रेत्य दृष्टांतमाह रज्जुसर्पेति साध्यसाधनवैकल्यं दृष्टांते परिहरति तथेति एतच्चोपपादितं पुरस्तात्

विषयाजनकत्वेपि दृष्टेः आकारार्पकत्वमुपपद्यते २

तात्पर्यार्थेप्यदस्य प्रामाण्यात्तस्मादविद्यायोनित्वं भावानां सुष्ठूक्तं अतोऽविद्याकल्पितस्य जगतः प्रतीतिसमकालीनमेव सत्वमुचितं रज्जुस
र्पशुक्तिरजतगंधर्वनगरस्वप्नप्रपंचेषु तथादर्शनात् अत्रेदं निरूपणीयं प्रतीतिमात्रं सत्वं चेत्सत्वं प्रातीतिकं मतं अविरोधात्तमसापीहं
तद्भेदे देवदत्त काप्रमा १७॥ प्रतीतिसमकालीनमेव सत्वं सत्वदर्शनात् २८॥

प्रतीतिमात्रकालीनं घटाद्यविद्यकं यतः रज्जुसर्पादिकं यद्वत्तथा चेदं ततस्तथा १ प्रतीतिमात्रकालीनं जगत् युक्त्या
निरूपितं प्रतीतिव्यतिरेकेण सत्वं चास्य निवार्यते २ ननु प्रतीतिसमकालीनं जगतः सत्वमुचितमित्युक्तं तत्र एकं जगतः सत्वमपरं ज्ञानस्ये
ति सत्वद्वयं प्रतीतिमात्रं न हि घटमात्रकालीनस्य पटस्य घटान्नातिरिक्तं सत्वं युगपदुत्पन्नविनष्टयोरपि घटपटयोर्भेदेनैकसत्वायोगात्
ततश्च ज्ञानज्ञेययोरपि भिन्नत्वात्सत्वैकत्वं न युक्तमित्याशंक्याह अत्रेदमिति अत्र प्रातीतिके जगतः सत्वे इदं बुद्धिस्थं वक्ष्य
माणं किमिदमित्यपेक्षायामाह प्रतीतीति प्रातीतिकं सत्वमित्यत्र यत्प्रतीतिमात्रं प्रतीतिरेव सत्वमिति मतं चेद्यदि सत्तु वादः
इमं पक्षमविरोधात्स्वीकुरुते अविरोधादिति अयोक्तयुक्त्या ज्ञानज्ञेययोर्भेदाज्ञानसत्वमेव ज्ञेयसत्वमिति तत्राह तद्भेद इति
ज्ञानज्ञेययोर्भेद इत्यर्थः काप्रमेति किं प्रष्टव्यं आद्ये प्रमाप्रमाणमित्यर्थः ततश्च ज्ञानज्ञेययोर्भेदे प्रमाणं किं न किंचिदित्यर्थः

श्लोकं व्याख्यातुं न्यूनमिकामाह प्रतीतीतिकोर्थस्तत्राह किं विशदयति किं प्रतीतिरेवेति ज्ञेयं तु प्रतीतिरेव अतस्तयोरभेदात् ज्ञेयसत्ता प्रतीतिसिद्धे
वेत्यर्थः विकल्पांतरमाह किं वेति जगतो ज्ञानात् व्यतिरेकेणाभेदेन सत्त्वं किं पृथगस्ति ज्ञानसत्तायाः जगत्सत्त्वं किं भिन्नमस्तीति द्वितीयविक
ल्पार्थः सत्वभेदे हेतुमाह प्रतीतिव्यतिरेकेणेति जगतस्तु न यत्र संबध्यते ज्ञानज्ञेययोर्भेदात्तत्सत्वयोरपि भेद इति आद्यस्यांगीकरिष्यमा
णत्वाद्द्वितीयं दूषयति अंगीकृतश्चेति अंगीकृतमेतत्तस्मिन्नाह हेतुत्वेनोपन्यस्ते ज्ञानज्ञेययोर्भेद इत्यर्थः न चेत्प्रमाणं ज्ञानव्यतिरेकेण जगतः
पृथक्सत्वे ततः प्रमाणाभावादेव ज्ञानज्ञेययोर्भेदस्तत्कृतस्सत्वभेदोपि न सिध्यतीति समुच्चित्य द्विरेवोक्तमिमं प्रमाणाभावपक्षं निराकृ
त्य विस्तरेणाद्यं प्रमाणसत्वपक्षं निराकर्तुमनुवदति अस्ति चेदिति प्रमाणमिति शेषः प्रमाणसत्वपक्षं दूषयितुं विकल्पयति तत्रेति
तत्र प्रमाणसत्वपक्षे किं प्राह स्वाचितानर्थं कस्मान्नाह प्रत्यक्षमिति साक्षिनाऽनुमानस्यानिपतविषयत्वादनुपलब्धिश्चाभावमात्रगोचरत्वाद्भयो

प्रतीतिसमकालीनसत्वं जगत इतिकोर्थः किं प्रतीतिरेव सत्त्वं किंवा प्रतीतिव्यतिरेकेण जगतः पृथक्सत्वमस्ति अंगीकृते तत्र प्रमाणमस्ति न वा
अस्ति चेत्तत्र किं प्रत्यक्षमनुमानमागमो र्थापत्तिर्वा प्रत्यक्षमिति चेत्तत्र घटोयमिति यत्प्रत्यक्षमिदमेव स्वस्मात् घटस्य भेदं विषयीकरोति
प्रत्यक्षांतरं वा स्वयमेव स्वविषयभेदं गृह्णाति प्रत्यक्षमिति चेत्तत्किं स्वप्रकाशं परप्रकाशं वा

स्वपन्यासः प्रत्यक्षं ज्ञानज्ञेययोर्भेदे प्रमाण

मितिपक्षं दूषयितुमनुवदति प्रत्यक्षमिति तत्रेति प्रत्यक्षप्रमाणसद्भावपक्षे इदं घटोयमिति प्रत्यक्षं स्वस्मात् घटोयमित्याकारात् ज्ञानरू
पात् घटस्य भेदं घटधर्मिणः संबंधिनं भेदं विषयीकरोति प्रमापयति प्रकाशयतीत्यर्थः आत्माश्रयप्रसक्तेर्विकल्पांतरमाह प्रत्यक्षांतरं
वेति अयं घट एतद्विषयकज्ञानात् भिन्न इति प्रत्यक्षं प्रत्यक्षांतरशब्दार्थः आद्यमनुवदति स्वयमेवेति स्वविषयभेदमिति

स्वप्रतियोगिकं विषयधर्मिकं भेदमित्यर्थः आद्यं निराकर्तुं तदुपयोगि विचारांतरमाह तत्किमिति तत्स्वविषयप्रत्य
क्षं स्वप्रकाशं अवेद्यं सदपरोक्षव्यवहारयोग्यं परप्रकाशं वेद्यमित्यर्थः

लि०मु० २६

घटोयमितिप्रत्यक्षं स्वप्रकाशं मतस्वस्मात्स्वविषयसंबंधिनं भेदं स्वयमेव गृह्णातीत्याद्यं पक्षमनूद्य दूषयति तत्राद्य इति तत्राद्ये इति शब्द
मित्यन्वयः तत्र स्वप्रकाशपरप्रकाशयोर्मध्ये इत्यर्थः इति शेषः परामृष्टमाह स्वेनैव स्वं जन्यत इति किमिति स्वेनैव स्वस्य जननमिति तदर्थी
मिदं विचार्यते प्रत्यक्षं स्वं नेदं घटमिति एतयागृह्णन् विशेष्यं घटं प्रति विशेषणत्वेन भेदं गृह्णाति मतोऽभिन्नो घट इति तन्मते घटयोर्भे
द इति स्वं नेदं विशेष्यत्वेन यदि स्वविषयविशेषणत्वेन स्वप्रतियोगिकं भेदं प्रत्यक्षं गृह्णातीति पक्षस्तदापीदमालोचनीयं किं विशिष्ट मतोऽभिन्नो घट इति
ज्ञानं विशेषणज्ञानविशेष्येंद्रियसन्निकर्षजन्यं किं वा विशेषणविशेष्योभयेंद्रियसन्निकर्षजन्यं विशेषणज्ञानजन्यं विशिष्टज्ञा
नमिति पक्षेऽपि स्यं विचारणीयं विशेषणस्य भेदस्य ग्राहकं ज्ञानं किमिदमेव यस्त्प्रत्यक्षं भेदग्राहकत्वेन संप्रतिपन्नं तदेव तदन्यज्ञानां
तरं यदि तदेव तर्हि विशिष्टज्ञानं स्वस्मात्स्वविषय[illegible]भेदग्राहकत्वेन संमतं यत्तदेव विशिष्टज्ञानजनकत्वेनाभिमतं विशेषण

तत्राद्ये स्वविषयविशेषणत्वेन भेदस्य ज्ञाने विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वपक्षे स्वेनैव भेदलक्षणविशेषणविषयेण स्वं ज
न्यत इति शामं तथा च आत्माश्रयः विशेष्यत्वेन भेदस्य ज्ञाने विशेषणविशेष्योभयेंद्रियसन्निकर्षमात्रं विशिष्टज्ञानस्य कारणमिति पक्षे

घटप्रत्यक्षयोः २

भेदज्ञानेन स्वेनैव जन्यत इति कथं नोक्तदोष इत्याह स्वविषयेत्यादिना स्वेनैव स्वजनने को दोष इति तत्राह तथा चेति इतरा
नवच्छिन्नेन स्वजनने कारणत्वेन स्वापेक्षणादित्यर्थः आत्माश्रयदोषपरिहारार्थं प्रत्यक्षं स्व[illegible]भेदं विशेष्यत्वेन गृह्णातीति
मतघटयोर्भेद इति २ पक्षमुत्थापयति विशेष्यत्वेन ज्ञानमिति भेदस्य विशेष्यत्वेन ग्रहणपक्षे धर्मिप्रतियोगिनोर्भेदं प्रति विशेषणत्वे तत्र प्रतियो धर्मिप्रतियोगिनोर्भेदं २
गिनं तं प्रत्यक्षं स्वप्रकाशं तेनैव भाति घटो धर्मी स्वमात्रविषयेण ज्ञानेन भाति तदन्यत्वेऽपि विशिष्टभेदप्रत्यक्षस्य स्वाजन्यत्वान्ना
त्माश्रयः इत्यर्थः एवमपि विशेष्येंद्रियसन्निकर्षत्वमादाय आत्माश्रयविशेषणविशेष्योभयेंद्रियसंनिकर्षजन्यत्वपक्षे एव
दोषान्तरं पक्षमुत्थापयति विशेषणेति

प्रतियोगिधर्मिज्ञानजन्यत्वेऽपि न
दूष

विशेषणविशेष्योभय २

अस्मिन्पक्षे आत्माश्रयं दातुं भूमिकामाह ज्ञानोत्पत्तेरिति अयमर्थः भेदग्राहकप्रत्यक्षस्योत्रेंद्रियसन्निकर्षजन्यत्वपक्षे भेदस्य विशेषणा
त्वेन विशेष्यत्वेन वा भाने भेदेंद्रियसन्निकर्षो वक्तव्यः भेदसन्निकर्षस्य विशिष्टभेदग्राहकप्रत्यक्षजनकत्वात् इंद्रियसन्निकर्ष
भेदस्वाश्रयोयस्य २ स्य भेदाश्रयत्वाच्च तदर्थं पूर्वं भेदसत्त्वावश्यकत्वेति न च त्वेवं भेदसत्त्वा पूर्वं तथा सति किं स्यादिति तत्राह तथा चेति इदमत्राकूतं इंद्रिय
सन्निकर्षाश्रयो भेदः स्वग्राहकं प्रत्यक्षं किं ज्ञातः सन् जनयति सत्तामात्रेण वा ज्ञातश्चेत्तत् ज्ञानं किमेतदेव ज्ञानं ज्ञानांतरं वा आद्यं दू भेदज्ञानं ४
षयति तस्यैवेति स्वप्रतियोगिकविषयधर्मिकभेदग्राहकत्वेनाभिमतस्य प्रत्यक्षस्यैव कारणीभूतभेदो विषयो न संभवेदित्यर्थः त
त्रैव हेतुमाह स्वोत्पत्तेरिति भावे चात्माश्रय इत्यर्थः भेदग्राहकत्वेनाभिमतविशिष्टज्ञानोत्पत्तेः प्राक् भेदज्ञानं ज्ञानांतरमेवेति नान्त्या

ज्ञानोत्पत्तेः पूर्वं भेदोऽस्तीति वाच्यं तथा च तस्यैव ज्ञानस्य कथं स भेदो विषयः स्यात् स्वोत्पत्तेः पूर्वं तस्यैवाभावात् ज्ञानांतरस्य च स्वयंप्रका
शत्वाभाविषयत्वेन तस्य प्रतियोगिकभेदाविषयत्वात् अवर्तमानस्य ज्ञानस्य परप्रकाश्यत्वे वर्तमानकालोपाधिकं स्वप्रकाशत्वमिति
स्यात् वर्तमानकाले ज्ञानस्वरूपमेव स्वप्रकाशमिति चेत्तन्न अतीतानागतयोरपि तथात्वापत्तेः

स्वप्रकाशज्ञानप्रतियोगिक २ ऽऽश्रय इत्यभिप्रेत्य पक्षांतरमुत्थाप्य दू
षयतीति ज्ञानांतरस्य चेति अयमत्राशयः तत्र ज्ञानांतरं किं निर्विकल्पकं सविकल्पकं वा नाद्यः भेदस्य सविकल्पकैकवेद्यत्वात् द्विती
यस्त्वाह स्वयंप्रकाशेति निर्विषयत्ता नस्य प्रतियोगिभूतस्य न स्वप्रकाशत्वमवर्तमानत्वात् तथा च तद्विषयकस्य भेदज्ञानस्यानुप भेद २
पत्तिरिति पूर्वोक्तिं त्वा परिहरति अवर्तमानस्येति परप्रकाश्यत्वे ज्ञानस्यावर्तमानत्वं हेतुं वदता वर्तमानज्ञानस्य स्वप्रकाशत्वमिस
र्थात् उक्तं भवति तत्र ज्ञानस्य स्वप्रकाशत्वे वर्तमानत्वं प्रयोजकं ज्ञानत्वं वा आद्यं दूषयति वर्तमानकालेति तथा च ज्ञानस्य स्वाभाविक वर्तमानकालोपा
स्वप्रकाशत्वांगीकारपक्षे क्षतिरिति भावः द्वितीये पूर्वदोषानतिक्रमं सूचयितुं पूर्वोक्तोत्तरमत्यामाह वर्तमानेति तथात्वापत्तेः स्वप्रकाशत्वाप धिकस्वप्रकाशत्व
त्तेः ज्ञानत्वाविशेषादित्यर्थः

तर्किं ज्ञानांतरं निर्विकल्पकं सविकल्पकं वेत्या-
दिना तस्यापि निरस्तत्वात् २

इत्यमर्थमर्थांतरन्यासेनाह नहीति यद्यप्यतीतानागतयोस्तर्हि ज्ञानत्वमेव प्रमास्तु तस्याशंक्याह नहीति स्वज्ञानत्वस्यागृहसंगाद्वित्यर्थः विशिष्टज्ञानस्य विशे-
षणज्ञानजन्यत्वपक्षे नेदस्य त्वविशेषणत्वेन भानपक्षे विशेषणज्ञानं विशिष्टज्ञानाहेत्वादिति पक्षोपि तेनैव निराकरणेन निरस्त इति न प्रथक्
दूषितस्तदिति बोध्यं इंद्रियसन्निकर्षाश्रयो नेदः स सत्तामात्रेण स्वविषयकप्रत्यक्षं जनयतीति पक्षमनूद्य दूषयति इंद्रियसन्निकर्षेति ननु
प्रत्यक्षे प्रत्यासत्तिर्नो सत्तेप्रत्यासत्तिश्च नेदेंद्रिययोर्यथाय विशेषणविशेष्यतानन्तरमंतरतः किमिति नेदस्य स्वरूपसत एव स्वज्ञानं प्रति ज-
नकत्वं प्रक्रियामात्रमिति तत्राह प्रमाणेति अस्तु विशेषणविशेष्यताप्रत्यासत्तिः सा तु सत्तो न भवति नासतः सत्वं च नेदस्य [illegible]
[illegible] प्रमाणाधीनमिति कथं न नेदविषयकप्रत्यक्षं तथा च नेदस्यागृहीतप्रमाणाणं मृग्यमिति तदभावा-
न नेदसत्त्वे तिश्च सत्त्व नेदः कथं ज्ञानं जनयेदित्यर्थः सत्तामात्रेणेतिरं विशेषणविशेष्यताप्रत्यासत्तिरपि इति ध्येय यत्तु मयि पाश्चात्यघटो
यमिति प्रत्यक्षमेव स्वप्रकाशं स्वविषये नेद इत्याहातीतिपक्षोनंसंवदीत्युक्तं ननु तदेव प्रत्यक्षं परप्रकाशं स्वविषययोर्नेदं घट इत्यनुन
प्रपक्ष १ चात्र पूर्वोक्तदोषः तस्य प्रतियोगिकविषयमिष्टनेदग्राहकज्ञानांतरस्वीकारे परप्रकाशप्रत्यक्षपक्षेप्युपपसमावादिति चेन्न इत्यस्मा-
घट१
नहि घटः कदाचिद्घट इति स्मात इंद्रियसन्निकर्षाश्रयस्य नेदस्य सत्तामात्रेण स्वविषयकज्ञानजनकत्वमित्यपि प्रक्रियामात्रं प्रमाणा-
भावेन सत्तामात्रस्याप्यसिद्धेः अस्तु तर्हि परप्रकाशज्ञानपक्षे प्रत्यक्षांतरेण ज्ञानांतरीयस्य नेदग्रहः सोपि मा भूत् प्रतियोग्याद्यग्रहपू-
र्वकोन नेवेति विवेचनीयं न चेत्रुक्तं नेदविषयकं स्यात् हीनेइ मिकं निःप्रतियोगिकं वा नेदं कश्चिन्स्यादिति अयं त्रसमाद्विनस्वस्यभावात्

प्रत्यक्षं नेदं विषयीकरोतीति प्रतिज्ञाया बाधादिति तदेव प्रत्यक्षं परप्रकाशं सत्स्वनेदं विषयीकरोतीति पक्षो व्हिरेव निरसनीयः
स्वप्रकाशज्ञानपक्षे प्रतियोगिनः प्रत्यक्षस्यावेद्यत्वात्तत्प्रतियोगिकनेदं ज्ञानांतरं विषयीकर्तुं न शक्नोतीति तत्पक्षमुपेक्ष्य
ज्ञानपरप्रकाशपक्षे नेदस्य ज्ञानांतरग्राह्यत्वपक्षमुत्थापयति अस्तु तर्हीति प्रतियोगिनोऽस्मत्प्रत्यक्षं प्रत्यक्षांतरं तमिमं पक्षं
दूषयितुं विकल्पयति सोपीति प्रतियोग्याद्यग्रहपूर्वकोन नेदग्रहः इतीमं पक्षं दूषयति न चेदिति आदिना प्रतियोग्यादिकमविष-
यीकृत्य किमिति प्रत्यक्षं नेदं न गोचरयति तत्राह नहीति अयमत्राशयः नेदग्राहिप्रत्यक्षं निर्विकल्पकं सविकल्पकं वा न तावत्
निर्विकल्पकं नेदस्य समवायादिवत्सविकल्पकैकवेद्यत्वात् सविकल्पकं चेत्तर्हि सविकल्पकं प्रमेयत्वेन नेदं विषयीकरोति नेद-
त्वेन वा न तावत्प्रमेयत्वेन निःप्रयोजनत्वात् न हि प्रमेयत्वेन जलज्ञाने पिपासुस्तदुपप्रमायप्रवर्त्तते नापि नेदत्वेन धर्मिप्रतियोगिज्ञा-
नं विना नेदत्वेन नेदग्रहस्य दुर्निरूपत्वात् नेदस्य तत्सापेक्षैकरूपत्वादिति स्मममेवार्थमभिप्रेत्याह त्वयमस्याधिति

धर्मिप्रतियोगिज्ञान १

आहत्तप्रतियोग्यादिग्रहपूर्वको भेदग्रह इति पक्षमप्युपदूषयति आवृत्तेति प्रतियोगिज्ञानं भेदज्ञाने हेतुरित्यत्र कीदृक्प्रतियोगिज्ञानं विवक्षितं निर्विकल्पकं वेत्याह किं चिदाकारः प्रतियोगिभेदज्ञाने ज्ञानेनासत्वज्ञानस्य स्वसमानाकारविषयोपस्थापकत्वात् अन्यथाति प्रसंगात् सविकल्पकं चेत्तत्किं भिन्नत्वेन प्रतियोग्यादिग्राहकं उत अभिन्नत्वेन वा न तावदभिन्नत्वेन प्रतियोगिधर्मिणोरभेदग्राहिणः प्रमाणत्वेनान्तरस्य भेदग्राहकत्वेनाभिमतस्याप्रामाण्यप्रसंगात् तदुपजीव्यान्तरस्य प्रवृत्तेः नतोभिन्नत्वेन धर्म्यादिग्रहः परिशिष्य तद्दूषेतमर्थमभिप्रेत्य प्रतियोग्यादिविषयपूर्वयति व्यावृत्तेति व्यावृत्तीतिप्रत्यक्षान्तरस्यापि व्यावृत्तप्रतियोग्यादिविषयत्वेनाविशेष णाव्यावृत्तप्रतियोग्यादिग्रहजन्यत्वात् तत्तद्ग्राहकान्तरस्वीकारेऽनवस्थापातादित्यर्थः भेदग्राहकत्वाभिमतस्य प्रत्यक्षस्य व्या

व्यावृत्तप्रतियोग्यादिग्रहपूर्वकत्वे तु व्यावृत्तिग्राहकप्रत्यक्षान्तरेऽप्येवमेवानवस्थातेनैव व्यावृत्तिग्रहेऽन्योन्याश्रयः तस्माद्वस्तु मात्रावगाहिप्रत्यक्षं न भेदवार्तामपि जानातीति सिद्धं अस्तु तर्ह्यनुमानात् ज्ञानं तयोर्भेदग्रहः तथाहि विमतो विषयः स्वविष यज्ञानाद्भिद्यते विरुद्धधर्माश्रयत्वात् यो यद्विरुद्धधर्माश्रयः स ततो भिद्यते यथा घटात्पटः तथा चायं तस्मात्तथैवं वि रोधस्य भेदनिरूप्यत्वेन भेदासिद्ध्या विरोधासिद्धेर्न विरुद्धधर्माश्रयत्वस्याप्यसिद्धेः

वृत्तप्रतियोग्यादिज्ञानत्वेनैव स्वयं

॥ अन्यतरस्यासिद्ध्याश्रयापत्तिरिति दूषयति भेदेनेवेति प्रत्यक्षस्य भेदाग्राहकत्वे निर्विषयत्वापत्तिमुपसंहारव्याजेन परिहरति त स्मादिति एवं प्रत्यक्षस्य भेदग्राहकतां पराकृत्यानुमानं भेदग्राहकमिति पक्षमुत्थापयति अस्त्विति स्वविषयेति विषयो घटो ज्ञात ज्ञानात्तद्भिद्यत इति सिद्धसाधनमिति साध्यं विशिनष्टि स्वविषयेति तद्विरुद्धेति तस्मात् ज्ञानाद्विरुद्धो यो धर्मः जडत्वमप्रकाशत्वं तदाश्रयत्वादित्यर्थः असिद्ध्या हेतुदूषणेन दूषयति भेदमिति धर्मस्य विरुद्धत्वं तावद्विरोधाश्रयत्वात् स च विवादं विरोधश्च ज्ञानज्ञेययोर्भेदज्ञानेनावज्ञातुं शक्यो नान्यथा तदुक्तं तस्य च साध्यत्वादसिद्धो तन्निरूप्यविरोधलक्षणधर्मविशेषणासिद्ध्या तदा विरोध२ श्रयत्वस्यापि असिद्धेर्मैवमित्यर्थः

ज्ञानज्ञेयभेदनिरूप्य२

ज्ञानज्ञेयभेदस्य२

भेदमात्रे

किंच ज्ञानप्रति॰ योगिको भेदः साध्यते भेदमात्रं वा नत्वावद्यः तत्रापि वादान्त्याद्यश्चेत्तत्राह साध्येति तथा च साध्यस्य पक्षविशेषणा
स्याप्रसिध्या पक्षाप्रसिद्धेराश्रयासिद्धिरित्यर्थः अथ ज्ञानतद्विषयोपरस्परं भिन्नौ विरुद्धधर्माश्रयत्वात् घटपटवदित्यविवक्षितप
रस्परं भेदश्च घटादावेव प्रसिद्ध इति नाप्रसिद्धविशेषणत्वेनाश्रयासिद्धिरिति तत्राह व्याप्यसिद्धेश्चेति कुतो व्याप्यासिद्धिरित्यत आह
नहीति व्याप्तिर्नाम साध्यसाधनयोरव्यभिचरितसंबंधः संबंधश्च द्वयोर्न यथा निरूप्यत्वात् न येन सत्तानवित्र तत्र साध्यं न दृष्टं तेपि स
त्वमारणाभावात् ततो साध्याप्रसिध्या तन्निरूपिता व्याप्तिरपि न सिध्यतीति व्याप्यत्वासिद्धो हेतुरित्यर्थः एतेनाश्रयासिद्धिरपि व्या
ख्याता केनचिन्मानेनेत्युक्तं विवृणोति प्रत्यक्षाभाव इति प्रत्यक्षस्य भेदग्राहकत्वमुपरिष्टान्निराकरिष्यते अनुमानांतरेति प्रकृ

साध्याप्रसिध्या व्याप्यासिद्धेश्च नहि घटपटयोर्भेदः केनचिन्मानेन न सिद्धः येन साध्यं प्रसिध्येत्
प्रत्यक्षाभावेनानुमानांतरानुसरणेप्यनवस्थादिदोषस्य तादवस्थ्यात् आगमस्य भेदमात्रे
तात्पर्यैकपर्यवसन्नस्य भेदबोधकत्वं शंकितुमप्यशक्यं ननु ब्रह्मणः सकाशात् सृष्टिं प्र
तिपादयन् आगमः कार्यजातस्य ततो भेदमपि प्रतिपादयति

तादनुमानादन्येन येनानुमानेन घटपटयोर्भेदो गृह्यते तत्रापि व्याप्तिग्रहस्तेनैव चेदात्माश्रयोऽन्येन चेदनवस्थेति
मा पूर्वोक्तदोषतादवस्थ्यमित्यर्थः ज्ञानज्ञेययोर्भेदप्रमाणमागम इति पक्षं दूषयति आगमस्येति पूर्वोत्तरकांडात्मकस्याग
मस्य तत्र पूर्वकांडस्य साध्यसाधनमुखेन संस्कारादिद्वाराच्छित्तीये ब्रह्मण्येव तात्पर्यादुत्तरकांडस्य षड्विधलिंगोपेतस्य
पुनः साक्षाद्वैताद्वैतपरत्वात् भेदबोधकत्वं शंकितुमप्यशक्यमित्यर्थः ननु यतो वा इमानि भूतानि जायंत इत्यागमस्य
देवताधिकरणन्यायेन ज्ञानज्ञेयभेदप्रतिपादकत्वात्तत्र प्रामाण्यमिति शंकते ननु ब्रह्मण इति ननु यतो वा इत्यादिवाक्यं ब्र
ह्मणो निमित्तोपादानरूपाज्जगतः सृष्टिमाह न भेदं तदप्रतीतेः ततः कथं देवताधिकरणन्यायेन तस्मिन्नुक्तस्य प्रामाण्यमिति ॥

भि भेदस्य १ ज्ञानज्ञेयभेदे २ ज्ञानज्ञेयभेदे १ यतोवेत्यागमस्य १

यतो वेति वाक्यस्य नैयायिकादिकल्पितपरमाण्वादिकारणान्तरध

विशेषणेन ३

तत्राह अभेद इति ब्रह्मजगतोरिति शेषः ततो ब्रह्मणः जन्मनस्यात्कार्यस्य नहि घटात् घटो जायते एकस्य पूर्वोत्तरभावित्वासंभवा
दित्यर्थः ननु ब्रह्मजगतोरेवं भेदेपि ज्ञानज्ञेययोर्भेदे किमायातं नहि कार्यं ज्ञानं तस्य जडत्वान्नापि ब्रह्म तस्यासंगित्वेन घटाद्य
प्रकाशत्वात् ततः कथं तयोर्भेदेपि ज्ञानज्ञेययोर्भेदः स्यादिति मैवं प्रकाशकं हि ज्ञानं दृश्यो हि चिद्रूपं ब्रह्म जगत्प्रकाशकं दृश्यं तु
दुत्वेन प्रकाशकत्वात् विषयरूपेणेति साधकं ब्रह्म एव प्रकाशकत्वपर्यवसानेन ज्ञानत्वोपपत्तेरस्त्येव भेदः कार्यस्य ज्ञानात्वे भेद
इति किं कार्यकारणप्रतिपादकत्वमात्रेणागमस्य ज्ञानज्ञेयभेदसाधकत्वमुत तस्य प्रमापकत्वेन नाद्यः विषं तु द्वैसादावे
तिप्रसंगात् न द्वितीयः तस्य परपरिकल्पितकारणान्तरनिराकरणपरत्वेन कार्यकारणभावाप्रमापकत्वादित्याह नेत्यादिना यतो
वा इमानि भूतानि जायन्त इति श्रुतानि मानीति तावद्भूतविशेषणं तेन नामरूपात्मनामाहतं नमसाप्यचिंत्यरचनारूपादीत्येवंभू
तधर्माः समर्प्यन्ते तेषां धर्मैः प्रधानादेरचेतनात्परिच्छिन्नज्ञानशक्तेर्वा हिरण्यगर्भादेर्जगतः संभवो न संभवतीति यतो वा इत्यादिश्रु
तिस्तेषां जगत्कारणत्वनिषेधपरा इत्यर्थः ननु सृष्टिवाक्यस्य परकल्पितप्रधानादेर्जगत्कारणनिराकरणपरत्वं नोपपद्यते समन्व

समन्वयाधिकरणोदितं तु समन्वयादित्यत्र भेदबोधकानां वाक्यानां ब्रह्मपरत्वप्रतिपादनात् १

प्रधानादीनां २

अभेदे तन्तो तन्मेव न स्यादिति चेन्न सृष्टिवाक्यस्य सर्वस्य प्रधानादिपरपरिकल्पितकारणान्तरनिराकरणपरस्य
मृत्घटादेः कारणकार्यस्य भेदेनानिरूपणात् ब्रह्मणः कारणात्कार्यजातस्य सर्वस्य भेदेनानिरूपणेनाद्वि
तीयब्रह्मसंभावनामात्रेतात्पर्यात् अन्यथा भेदपरत्वे तन्निषेधोऽनर्थकः स्यात्

ब्रह्मसंभावनामात्रे २

ब्रह्मजगतोरभेदे २

याधिकरणविरोध इति तत्राह अद्वितीयेति अद्वितीयं विजातीयभेदशून्यं यद्ब्रह्म तदीयासंभावनापूर्वोक्तस्वरूपं ब्रह्मन विदुमर्हे
तीत्येवंरूपा तन्मात्रे सृष्टिवाक्यस्य तात्पर्यात् तेनेति पूर्वनिषेधे हेतुत्वेनान्वयः संभावनायां हेतुमाह ब्रह्मणः कारणादिति अत्र दृष्टान्तो मृत्
घटादाविति भेदे हिमवद्विन्ध्ययोरिव कार्यकारणभावादर्शनात् मृत् घट इति सामानाधिकरण्याच्च तयोरभेदे कार्यकारणभावो युज्यते
इत्यर्थः ननु मृत्घटयोरभेदे पूर्वोत्तरभावासंभवात् पूर्वोत्तरभावव्याप्तः कार्यकारणभावो विनाभेदं न संभवतीति सृष्टिवाक्यं भेदप
रमेव किं न स्यादित्याशंक्याह अन्यथेति अन्यथा पार्थक्यमाचष्टे भेदपरत्वे इति तस्य भेदस्य निषेधस्तन्निषेधः भेदस्य सृष्टिवाक्यतात्पर्य
विषयत्वे नेह नानास्ति किंचनेत्यादिश्रुत्यानिषेधोऽनर्थः स्यात् अखण्डवस्तुसिध्यर्थो हि भेदनिषेधः न च श्रुतितात्पर्यविषये सति भेदे
खण्डवस्तुसिध्यतीति वाक्यार्थः तन्निषेधस्यार्थः न च विनाभेदं पूर्वोत्तरभावासंभवान्न कार्यकारणभाव इति सांप्रतं कल्पितभेदमाश्रि
त्य कल्पितकार्यकारणभावविरोधाभावात्

सि०मु०
२९

स्वप्रमापयन्ति वाक्यार्थत्वेभवाविनाभेदं वाक्यार्थः कार्यकारणभा

किंच सृष्टिवाक्यं नेदंपरमिति कोर्थः किं तद्वाक्यं पदार्थत्वेनभेदं साक्षात्स्वप्रमापयति वाक्यार्थत्वेन वा सर्वथापि न संभवतीत्याह किंचेत्यादिना नेदेन सृष्टिवाक्य निवि
वोनोपपद्यत इति वाक्यार्थोपपादकनेदमर्थात्कल्पयतीति वा सर्वथापि न संभवतीत्याह किंचेत्यादिना नेदेन सृष्टिवाक्यं निषेधस्यवि
ष्टपदार्थः सृष्टिवाक्येन नेदोपस्थापकपदाभावादपदार्थत्वाच्च न वाक्यार्थ इत्यर्थः ननु पदार्थस्यापि परस्परं नो जननिषेधस्यवि
षं नुं त्वेति वाक्यार्थतावत्त्वं ब्रह्मजगतोर्भेदस्यापदार्थस्यापि सृष्टिवाक्यार्थता किं न स्यादित्यत आह पदार्थस्येवेति अखंडवाक्या
र्थत्वप्रसंगात् इत्याह धर्मीति वाक्यप्रतिपाद्यत्वादित्यत्र साक्षादिति शेषः ततश्च परस्परं नो जननिवृत्तेरपदार्थत्वान्न साक्षा
र्थत्वप्रसंगात् इत्याह धर्मीति वाक्यप्रतिपाद्यत्वादित्यत्र साक्षादिति पूर्वपक्षः तत्त्वावत्सृष्टिवाक्यमेव कार्यकारणयोर्भेदं कल्पयति
द्वाक्यार्थत्वेनेति दोषः ततीयं पक्षं निषेधयति कल्पना याश्चेति ननु तावत्सृष्टिवाक्यमेव कार्यकारणयोर्भेदं कल्पयति

वाक्यार्थत्वाभावात्
किंच सृष्टिवाक्यं न साक्षात्तन्नेदं प्रतिपादयति नेदवाचकपदाभावेनापदार्थस्य वाक्यार्थत्वाभावात् कल्पनायाश्च निषेधवाक्यवि
पदार्थस्येव संसृष्टत्वेन वाध्यर्थमात्रपरत्वेन वा वाक्यप्रतिपाद्यत्वात् कल्पनायाश्च निषेधवाक्यवि
रोधेनानुत्थानात् न च ज्ञानमेवस्वातिरिक्तं ज्ञेयव्यतिरेकेणानुपपन्नं स्वभिन्नं ज्ञेयं विषयीकरोति

नेदस्यानास्ति किंचनेति
निषेधवाक्यं। २२

अचेतनत्वान्नापि वाक्यार्थः स्वप्नपुरुषोनेदं कल्पयति पूर्वं कल्पनायाः श्रुतिविरोधेनाभासत्वादित्यर्थः एतेनार्थापत्ति
र्भेदे प्रमाणमिति निरस्तं ज्ञानात्मकब्रह्मजगतोर्भेदे तयोः कार्यकारणभावानुपपत्तिः प्रमाणमिति प्रसंगान्निरस्तं
ज्ञेयं विना ज्ञान
स्यानुपपत्तिः २
ज्ञानान्यथानुपपत्तिः ज्ञानज्ञेयभेदे प्रमाणमित्यापूर्वं क्यप शश्चेष्टं न चेत्यादिना इति न च वाच्यमित्यन्वयः इति शष्टप
रामृष्टमाह ज्ञानमेवेत्यादिना यथा दाह्यं विना वह्निरात्मानं न लभते तथापि विना ज्ञेयं ज्ञानं स्वरूपमेव न लभते तेन सोऽव
श्यं ज्ञेयेन भवितव्यं तेन ज्ञेयं न स्वयमेव वृत्तिविरोधात् तस्मात् ज्ञानमेव स्वभिन्नज्ञेयमंतरेणानुपपन्नं ज्ञेयं कल्पय
ज्ञानं २
तीति ज्ञानज्ञेययोर्भेदसिद्धिरिति

एकस्मिन् ज्ञानत्वज्ञेयत्वविरोधात् २

ननुदाह्यप्रनवोवन्हिर्विनादाहेनसंभवतात्रियुक्तंज्ञानंतुनविषयजन्यंततःकथंविनाविषयंज्ञानमेवनसंभवतीतितत्राहनही
तिअर्थप्रकाशोहिज्ञानंअस्यसंज्ञामतिचार्थकस्यप्रकाशनंज्ञानेनभवेन्नतत्रोर्थनिरूप्यत्वात्ज्ञानस्यविषयाभावेनतस्यस्वरू त्वे
पंसंभवतीत्यर्थःनन्वसंभावितोप्यर्थःप्रामाणिकत्वेस्वीक्रियतेएवयथोस्यातिकःसवितशिशुबिशिशितत्राहदृष्टमिति
दृष्टंवानहीत्यन्वयःनिर्विषयज्ञानेप्रमाणाभावंप्रतिज्ञायतत्रसविषयज्ञाननाप्रसंगेहेतुनाहसविषयस्यैवेतिननुकस्मिं
श्चिन्नूतलेघटवत्यपिनतलांतरंनिर्घटंयथास्यात्तथाकस्मिंश्चिन्ज्ञानेसविषयेपिज्ञानांतरंनिर्विषयंकिंनस्यादितिशं
कानिरासायाहसर्वेतिअत्रावधारणार्थमुपपादयतिअन्यथेतिअन्यथानिर्विषयज्ञानमतीत्यर्थःननुघटोयमितिज्ञा
नेघटोविषयःघटत्वंचप्रकारइत्युभयंसंमतंनतस्यविषयप्रकारयोर्भेदात्किमितिविषयाभाववतिःप्रकारकंज्ञानंनामि
ष्यतइतितत्राहज्ञानइतिज्ञायमानवैशिष्ट्यनिरूपकोहिज्ञानेप्रकारःसचविशेष्यवज्ज्ञायमानत्वाद्विषयइतितस्याप्यभाववतिः

नहिनिर्विषयंज्ञानंसंभवतिदृष्टंवाप्रविषयस्यैवज्ञायमानत्वादन्यथाविःप्रकारकमेवज्ञानंस्यात्ज्ञानेविषयातिरिक्तस्यप्रकार
स्याभावादितिवाच्यंज्ञेयव्यतिरेकेणज्ञानस्यानुपपत्त्यभावादन्यथादित्यत्किंज्ञानस्यज्ञेयव्यतिरेकेणोत्पत्त्यनुपपत्तिःउतज्ञानुप स्थि
पत्तिःउतस्थित्यनुपपत्तिर्वानाद्यःज्ञानस्यस्वरूपतउत्पत्त्यभावात्तेनाभावेवाप्रमाणतदाभासात्मनस्तदुत्पादसंभवेविषया
नपेक्षणात्ज्ञानस्यसर्वत्रविषयजन्यत्वेनियमाभावात्नापिस्थित्यनुपपत्तिःविषयस्यज्ञानानाश्रयत्वात्

प्रकारकमेवज्ञानंजायेतइत्यर्थःननुज्ञानंविनाज्ञेयंअनुपपन्नंवृत्तिविरोधात्स्वभिन्नज्ञेयंकल्प्यतइतिनचवाच्यमि
तिप्रतिज्ञायांहेतुमाहज्ञेयेतिज्ञेयंविनाज्ञानस्यानुपपत्त्यभावमुपपादयतितथाहीतिज्ञानज्ञेययोर्भेदेज्ञानस्यज्ञेयव्यति
रेकेणोत्पत्त्यनुपपत्तिस्तत्प्रमाणंकिमित्यर्थःज्ञानस्यस्वभिन्नज्ञेयमंतरेणोत्पत्त्यनुपपत्तिरितिकिमेकदेशिमतंउतसर्वस्य
तस्याद्यखंडेतत्राहज्ञानस्येतिज्ञानस्यशरीरपरकत्वाकारेणोत्पत्तावपिस्वरूपतोनित्यसन्नावत्वेनोत्पत्त्यभावादित्यर्थः
व्युत्थितंप्रत्याहनावेतिअन्यथैवोपपत्तेर्नेयमर्थापत्तिःप्रमाणमित्यर्थःननुयथाप्रमाःप्रमेयप्रमाणतदाभासोकारणत्वेनापे
क्षंतेतथाकारणत्वाविशेषात्प्रमापिविषयमपेक्षतेएवेतिकथंतद्व्यतिरेकेणतयोरुत्पत्तिरितितत्राहज्ञानस्येतिअनुमि
त्यादौव्यभिचारादित्यर्थःद्वितीयंदूषयतिनापीतिनैयायिकादीनप्रतिहेतुमाहविषयस्येति

सि०मु० ३० तादृशं प्रत्यासत्तेः तथा च ज्ञानस्य तथात्वे विषयस्य ज्ञानाश्रयत्वे ज्ञानाश्रयस्य प्रमातृत्वादित्यर्थः कथं तर्हि ज्ञातो घट इति प्रत्यय
इति इत्यतो घट इति वक्तव्यं तेन ज्ञानं तृतीयमुपस्थापयति ज्ञानविषयकेति ज्ञानस्य ज्ञेयं विना तस्यानुपपत्तिः तेन ज्ञेयमपेक्ष्यमा
णमस्तु ननु ज्ञानं ज्ञानस्य विषयी न तु ज्ञानविषयं विना किमनुपपन्नं स्वरूपमेवेत्यत आह ज्ञानविषयकेति विषयज्ञानाधी
नत्वेनामविषयमात्रस्य ज्ञानजन्यत्वेन तस्य ज्ञानत्वं तज्ज्ञानविषयस्यापि ज्ञानजन्यसौ कारणाभावे तद्भावे ज्ञानज्ञप्तिरनुपपन्ने
त्यर्थः ज्ञानज्ञप्तेरन्यथा ज्ञानज्ञप्तिकारणत्वेन ज्ञेयसिद्धिरित्यपि पूर्वपक्षनिबंधमुक्तिज्ञानीतेनेति ज्ञानं किं स्वव्यवहार
तस्यैव विवादास्पदीभूतत्वात् २ र्थं स्वातिरिक्तज्ञानमपेक्षते उत तद्विषयव्यवहारार्थं नाद्यः ज्ञानातिरिक्तविषयस्याप्यसिद्धेः नाद्यं दूषयन्नेति प्रतिज्ञायां हे
तुमाह ज्ञानस्येति स्वयंप्रकाशमानत्वेनेति अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वेनेत्यर्थः ननु ज्ञानं स्वयंप्रकाशं तस्य वस्तुत्वेन

घटज्ञानवानहं इत्याकारकानुव्यवसायस्य। भ्रमा। तथात्वे चाविषयत्वव्याघातात् ज्ञानविषयकज्ञानस्य विषयज्ञानाधीनत्वेन ज्ञेयं विना तस्यानुपपत्तिरस्तु इति चेन्न
न ज्ञानस्य स्वयंप्रकाशमानत्वेन स्वव्यवहारार्थं स्वातिरिक्तानपेक्षणात् परप्रकाशत्वेन ज्ञानान्तरापेक्षायां तस्याप्य
नवस्थापत्तेः इत्यनवस्थितत्वात् ज्ञानासिद्धौ जगदान्ध्यप्रसंगात् अज्ञायमानस्यैव ज्ञानस्य स्वविषयसाधकत्वे प्रमा
णाभावेन नरशृंगतुल्यस्य स्वरूपस्यासिद्धेः

व घटं वेद्यत्वादिति तत्राह परप्रकाशत्वेनेति ज्ञानं किं ज्ञायमानं विषयसाधकं उत अज्ञायमानं नाद्यः प्रथमज्ञानवत् ज्ञाना
त्मकज्ञानान्तरस्यापि स्वविषयसिद्धिमत ज्ञानसाधकत्वापत्तौ ज्ञानान्तरान्वेषणायां तावत्तृतीयज्ञानस्यापि ज्ञानान्तरापेक्षाया
मनवस्थाप्रसंगः इत्याह ज्ञानान्तरापेक्षायामिति प्रथमज्ञानस्येति शेषः ननु नेयमनवस्था दोषाय मूलक्षतेः प्रथमज्ञा मूलक्षतिकरी अनवस्था
नस्य कृत्याभावादिति तत्राह ज्ञानासिद्धाविति यदेव ज्ञानं न ज्ञायते तत्सत्त्वापत्त्या तद्विषयज्ञानस्यापि प्रमाणाभावादस दूषणमिति
२ त्वापत्त्या संविद्धारायाः अप्यसत्त्वापत्त्या मूलक्षतेः ज्ञानस्याप्यसिद्धिः स्यात् तदसत्वे च जगत्प्रपंचस्य स्वयंसिद्धिरन्यथा चार
नेनाशः स्यादिति परप्रकाशत्वं ज्ञानस्यानयुक्तं इत्यर्थः द्वितीयं दूषयति अज्ञायमानस्यैवेति॥

व ~ म मूलत्रू तज्ज्ञानस्य २

ननु यदा कदापि प्रमाणप्रवृत्त्या स्वरूपं सेत्स्यतीति तत्राह अस्तु वेति पूर्वं ज्ञानस्य ज्ञप्तिरेव न संभवतीति अर्थापत्त्या वसंभवो दोषप्रसंगः अ
स्तु वेत्यादिनानु अन्यथैवोपपत्तिरुच्यते इति विवेकः विषयीभूतज्ञानस्य यो विषयस्तदपेक्षणां ज्ञानविषयकज्ञानांतरस्य कुत इत्यर्थः घटादिकमपि र
विषयज्ञानस्येति ज्ञानज्ञप्तिर्हि स्वविषयं ज्ञानमेवापेक्षते न विषयीभूतज्ञानविषयमपि स्वविषयज्ञानमात्रेण चरितार्थत्वादित्यर्थः ज्ञानमात्रेश
ननु ज्ञानज्ञप्तौ किं ज्ञानसामान्यमेव विषयः किं वा ज्ञानविशेषः नाद्यः घटज्ञानमित्याकारत्वात् ज्ञानमात्रविषयत्वायोगात् ज्ञानमात्रानपेक्ष
णात् अथ घटादिः द्वितीयः तर्हि ज्ञाने विशेषस्य विषयाधीनत्वात् कथं विषयाभावे ज्ञानज्ञप्त्युपपत्तिरिति पूर्वपक्षी शंकते ज्ञानसामान्य ज्ञान २
स्येति समस्तं ज्ञानविशेषो ज्ञप्यमानस्य ते इति स च ज्ञाने विशेषो व्यावृत्तिरूपो न विषयहृत इति न तज्ज्ञप्तिर्विषयमपेक्षते इत्यभिप्रेत्य प
रिहरति ननु छेमिति कुतस्तर्हि ज्ञानांतरेभ्यो घटज्ञानस्य व्यावृत्त्यात्मकविशेषसिद्धिरिति शंकां परिहरन् ततु छेत्व प्रतिज्ञायां हेतुमाह ज्ञा

अस्तु वा ज्ञानस्य स्वज्ञानार्थं ज्ञानांतरापेक्षा तथापि विषयापेक्षणं कुतः विषयज्ञानस्यैवापेक्षणात् ज्ञानसामान्यस्यानपेक्षणे त
स्वविषयव्यावृत्तज्ञानापेक्षायां विषयापेक्षाप्यवश्यं भाविनीति ननु छं ज्ञानस्य स्वत एव व्यावृत्तत्वात् परसिद्धजात्यादिवत् त
थापि ज्ञानस्य ज्ञेयव्यावृत्तत्वात् ज्ञेयं बोधयतीति चेत्

नस्येति विषयो ज्ञाने किं ज्ञानव्यावृत्तिहेतुः उत ज्ञाने व्यावृत्तिप्रतीतिहेतुः नाद्यः व्यावृत्तेरन्योन्याभावत्वेनाजन्यत्वात् जन्यत्वे वा तद्धेतुत्व व्यावृत्तस्यते
सर्वाभिन्नसं २ न्ये: प्राक् ज्ञानं सर्वाभिन्नस्वभावमुत्पन्नमिति कथं न विषयात् व्यावृत्तिस्ततो स्वभावं न स्यात् तत्र अतीतानागतविषयकज्ञानस्य व्या विषयासत्त्वात् २
वृत्तत्वप्रसंगाच्च अर्थविषयः स ज्ञाने व्यावृत्तिं प्रसाधयति स्वयमसतीतां प्रसाधयेत् सतीवा न तावदाद्यः असतोऽप्रकाशनात् द्विती
ये ज्ञानव्यावृत्तिसत्त्वं न विषयाधीनमिति स्वत एव व्यावृत्तं ज्ञानमिति यथा परेषां वैशेषिकादीनां पटत्वादिभ्यो व्यावृत्ता घटत्वादि
जातिः स्वत एव ननु व्यक्त्या व्यावर्त्यते अन्योन्याश्रया तत्र स्वविशेषाभ्यस्वत एव व्यावृत्तास्तथा ज्ञानमपि स्वत एव व्यावृत्तमिति
ज्ञानस्य परप्रकाशत्वपक्षेऽपि तत्स्यादिति न विषयनिरूप्येति न ज्ञानज्ञप्त्यनुपपत्तिस्तत्र प्रमाणमित्यर्थः ननु यद्यपि विषयो न ज्ञानो विषये २
सत्तिहेतुः नापि तत्स्थितिहेतुर्नापि तज्ज्ञप्तिहेतुः तथापि यथा दाह्यव्याप्तो वन्हिर्दाह्यं दहति तथा ज्ञेयव्याप्तं ज्ञानं ज्ञेयं भास
यतीत्यस्ति ज्ञेयमिति शंकते तथापीति बोधयति ज्ञानमिति शेषः

सि०मु०
३१
संशये=४

यत्र यदा वह्निस्तत्र तदा दाह इति युक्तं वह्निर्दाहं दहतीति ज्ञानं पुनर्न ज्ञेयेन व्याप्तं विभिन्नदेशत्वात् क्वचित् विभिन्नकाल-
त्वाच्चेति दृष्टान्तदार्ष्टान्तिकवैषम्येण परिहरति नेत्यादिना तच्चैतदेव टीकाकृन्मेति चतुर्थपादं संगृह्णीते चित्रं ममेतावता ग्रन्थेन यत्प्रति-
पादितमुपसंहरन् श्लोकेन संगृह्णाति तस्मादिति ननु ज्ञानज्ञेययोरभेदे किं ज्ञानमेवावतिष्ठते ज्ञेयमेव वा विविधविनिगमकाभावा-
द्विषये किं प्रतीतिरेव सत्यमित्योघविकल्पांगीकारेण रूढप्रतीतिमात्रमेवेति यदेतद्विश्वं भातितत्प्रतीतिमात्रमेवेति यत्तदो-
र्वध्याहृत्य योजना अथवा यत्प्रतीतिमात्रं स्वप्रकाशमहिम्ना भाति एतदेव विश्वं न ततोतिरिच्यत इत्यर्थः जडप्रपंचस्या-
त्मसिद्धये ज्ञानापेक्षायाश्च वक्ष्यमाणत्वात् ज्ञानस्य च विषयानपेक्षया प्रकाशमानत्वात् ज्ञानेनैव विषयोन्तरस्तु वित्तु
मर्हतीत्यर्थः ननु यदि प्रतीतिरूपमेव जगत्प्रतीतितो नातिरिच्यते कथं तर्हि चराचररूपेण भेदेन नानात्वेन च प्रतीतिः

न व्याप्यसिद्धेर्ज्ञानज्ञेययोर्भिन्नदेशत्वेन सामानाधिकरण्याभावात् अतीतानागतार्थज्ञानदर्शनेनैककालत्वस्यापि
सिद्धेः तस्मात्सूत्रेन अनुद्भूतो भेदः प्रामाणिकः कुतः प्रतीतिमात्रमेवैतद्भाति विश्वं चराचरं १८ ज्ञानज्ञेयप्रभेदेन
यथा स्वाप्नं प्रतीयते विज्ञानमात्रमेवैतत्तथा जाग्रच्चराचरं १९ ततो भेदं पटीयच्छून्यतावस्वरूपतः आत्मनोपि तथे-
वेदं नाममात्रं चराचरं २०

तत्राह ज्ञानज्ञेयेति वस्तुतो विज्ञानस्वरूपमेव स्वाप्नं स्वाप्नावस्थासंबंधि जगत् ज्ञानादिभेदेन प्रती-
यते तथा च स्वप्ने विज्ञानमेव ज्ञेयात्मना नानात्वेन भाति यथा तथापि विज्ञानमात्रमेवैतज्जगज्जाग्रत्कालीनं चराचरात्मकं नाना-
त्वेन भातीति तद्ज्ञानं भेदेन च ज्ञानं नानुपपन्नमित्यर्थः ननु किमिति विज्ञानमेव जगद्रूपेण भातीति कल्प्यते विज्ञानाद्भेदे-
न सतां जगत् ज्ञासतां इति तत्राह ततो भेदमिति पटः स्वरूपतो वस्तुतस्तंतोर्भेदं शून्यत्वे तस्यान्वयः कारणसत्त्वे कार्यस-
त्त्वान्तत्रैव कार्यस्य सत्त्वात् तिंतं तु नो वपि पटः स्यात् तन्तुपटं प्रसिद्धं ताः समवायिकारणत्वेनाश्रयत्वात् तद्दशावे पटो नास्तीति
हेतु तंतुसत्त्वेव पटसत्तेति चेत् न हि मवाद्ध्वयोरविभेदका कारणाभावस्यापि दर्शनात् तथा च तंतुपटयोरन्तरावकाशेपटस्य तंतुसा-
पेक्षत्वात्ततो भिन्नपटानिरपेक्षत्वात् तंतुरेवावशिष्यत इति तंतुभेदे पटः शून्यता वस्त्वर्थः इदं प्रतीतिमात्रं च चराचरं जगदात्मनो यदि स्वरूप

[illegible]

ननु चिदात्मनो जगद्रूपेण भाने विकारित्वप्रसंग इति विवर्तवादाश्रयान्नेति सदृष्टांतमाह रज्जुरिति नन्वज्ञाता रज्जुः सर्पादिरूपेण
भासते इति युज्यते तस्याः सर्पाधिष्ठानत्वात् ननु तद्वदात्माऽज्ञानवशादपि जगद्रूपेण भासते इति कल्पयितुं युक्तं तस्य निमित्त
मात्रत्वेन जगदधिष्ठानत्वानुपपत्तेरिति तत्राह आत्मैवेति जगदुत्पत्तिस्थितिनिवृत्तिहेतुत्वादात्मनो न निमित्तमात्रता
किंतु उपादानतापि जगदधिष्ठानत्वमेवाज्ञातस्यात्मनो युक्तमिति नन्वात्मनो जगद्रूपत्वे अनात्मतापरिच्छिन्नजगद्रूप
त्वात् तथा दुःखत्वापत्तिः दुःखस्वरूपजगदात्मत्वात् तथा नानात्वं चात्मनोऽनिष्टमापद्येत नानात्मकजगदात्मत्वात् तत्राशु
द्धिरप्यात्मनि दुर्निवारा तथाविधजगन्मयत्वात् तथा धर्मादिमत्त्वप्रसक्तिश्च न हि धर्माद्यनपेक्ष्यात्मा जगत्तज्जनयतीति वै

रज्जुर्यथा भ्रांतदृष्ट्या सर्परूपा प्रकाशते आत्मा तथा मूढबुद्ध्या जगद्रूपः प्रकाशते २१ आत्मन्येव जगत्स
र्वं दृष्टिमात्रसमस्तकं तद्रूपस्थितिमास्थाय विनश्यति मुक्तमुक्तः २२ पूर्णानंदाद्वये शुद्धे पापदोषादिवर्जिते प्रति
बिंबमिवाभाति दृष्टिमात्रं जगत्त्रयं २३ उक्तं भगवता वशिष्ठेन तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः इमास्ताः
प्रतिबिंबंति सरसीव तटद्रुमाः तथा यथा यस्य चिन्मयी लीला जगदेतच्चराचरं यस्य विश्वात्मकत्वेऽपि खंडता नैकपिंडता

षम्यादिदोषप्रसंगात् तन्न च जीवादृष्टमुपजीव्य तेन स्वादृष्टमिति वाच्यं जीवब्रह्मणोरभेदात् किंच यथा दुग्धं दध्याकारतामाप
न्नं दध्येवावशिष्यते न दुग्धं तथात्मापि जगद्रूपतापन्न इति जगदेव स्यान्न त्वात्मेत्येवं शंकितदोषानपाचष्टे पूर्णेत्यादिना
अज्ञानवशादेव परिच्छिन्नाद्यात्मकजगद्रूपता आत्मनो न वस्तुतः इति नैकोऽपि दोष इति यथा दर्पणो बिंबसन्निधौ प्रतिबिं
बात्मना भासमानोऽपि प्रतिबिंबाकारताया मिथ्यात्वात् न स्वरूपं जहाति एवमात्मनोऽपि जगदाकारताया मिथ्यात्वात् जगद्रूपेण
भासमानोऽप्यात्मा न स्वरूपं जहाति इत्यत्र दृष्टांतमाह प्रतिबिंबमिवेति उक्तेऽर्थे साक्षित्वेन शास्त्रवाक्यमाह उक्तमिति

म २

अत्र वदन्तीत्यादिना ग्रन्थेनैकदेशिनिराकरणव्याजेन निरूपितं प्रमेयमुपसंहरति तदेवमिति यतो ज्ञानज्ञेयविभागो न प्रामाणिकः तस्मादे
वमस्ति दृष्टिदृश्ययोरन्यतरावशेषे प्राप्ते दृश्यस्य सापेक्षत्वात् दृष्टेश्च निरपेक्षत्वात् दृष्टिरेवावशिष्यते न दृश्यमित्येवमतीत्यर्थः अत
वाच्यं द्रव्याद् अतिरिच्यते तथा प्रकृतेपीत्यर्थः नन्वस्वरूपात्किंचिद्भिन्नमस्ति न वा नाद्यः तस्य निःस्वरूपत्वप्रसक्तेस्तुच्छत्वापत्तेः अथ स्वरूपा।
स्वव्यवहारेरतासापेक्षत्वनिरपेक्षत्वाभ्यां विशेषात् न चाभेदे तदनुपपत्तिः एकस्मिन्नपि देवदत्ते पितृत्वादिव्यवहारार्थं पुत्राद्यपेक्षाद
र्शनात् न च प्रामाप्रामविवेकेन सापेक्षत्वमेव भेदे स्वितिवाच्यम् तस्यापि स्वरूपानतिरेकात् न च स्वरूपाद्यस्य भेदस्तस्य निःस्वरूपता
पत्तिरन्यथा स्वरूपमेवावृत्तमिति वाच्यं घटात् घटस्य भेदस्य घटत्वादर्शनात् न च घटाद्धेकस्मात् घटान्तरे वैधर्म्यमस्त्येवेति वाच्यमस्य
तस्यापि तस्योक्तदोषेणाभेदत्वानंगीकारात् न च वैधर्म्यसत्त्वेच स्वरूपभेद इति वाच्यं अनात्मस्वरूपाणामपि वैधर्म्यव्याप्तत्वात्
द्भिन्नं नास्ति तर्हि स्वरूपमेकरसमेवेति ननु यद्यपि स्वरूपप्रतियोगिकोन भेदः तथापि स्वरूपमेवेतरभिन्नं किं न स्यात् तथा च अतः स्वरूपमेवाएवं
रूमिति चेन्न स्वरूपभेदस्य प्रतियोगिनो निःस्वरूपत्वभेदस्यापि तत्त्वापत्तेः स्वरूपत्वे स्वस्मादेव भेदापत्तिरिति सिद्धान्तिमतमाशंक्य निराचष्टे नचे।
त्यादिना॰ स्वरूपाद्भिन्नमस्त्येव न च तस्या स्वरूपत्वापत्तिः घटभिन्नस्य घटान्तरस्याघटत्वादर्शनादित्यर्थान्तरन्यासेन हेतुमाह घटादिति॰ ननु
घटात् घटस्य भेदेप्यघटत्वादर्शने किं भेदान्तरं प्रयोजकं किं वा घटस्वरूपभेदेपि प्रतियोगितावच्छेदकभेद इत्याद्यमनूद्य दूषयति नचेत्यादिना।
उक्तदोषेणेति धर्मिप्रतियोगिभेदानांगीकारस्योक्तदोषेणेत्यर्थः द्वितीयमनूद्य दूषयति नचेति॰ अनात्मस्वरूपाणां वैधर्म्यव्याप्तत्वेन न तत्स्वरूपभे

दैरेवप्रतियोगितावच्छेदकभिन्न नेदव्यवहारमतिनीतिः स्वरूप

तथापि ... अनात्मस्वरूपाणामपि॰ ...

६ ६४ २

ननु किं स्वरूपमेव भेदः उतमोपि नाद्यः इतरस्यापि भेदत्वे दोषाभावात् तथाहि भिन्नेयमित्यादिभेदो वर्त्तते इमे च स्वीक्रियते न चान्योन्याश्रयादिदोषः
स्वरूपभेदभिन्नेयमित्यादिप्रतिभेदस्थितेः स्वरूपभेदस्य चेतरानपेक्षत्वात् न केवलं स्वरूपमेव भेदः किं तु सर्वेप्यन्योन्याभावादयोपि यथायोग्यं भेदा
इति कस्यचित्कल्पनामुत्थापयति यत्त्वित्यादिना घटादौ भेदत्रयं विविच्य दर्शयति स्वरूपमिति वैधर्म्यमसाधारणो धर्मो घटत्वादिः सामा
न्यादावपि द्रव्यादित्रयं तावन्न सामान्यसमवायवृत्तिद्रव्यमात्रवृत्तित्वात् न सामान्यं सामान्ये समवाये वा वर्त्तते तयोः निःसामान्यत्वात् समवा
यस्य सामान्यवृत्तित्वेपि द्विष्ठत्वाद्वैधर्म्यत्वात् तस्मात्स्वरूपभेदोऽन्योन्याभाववद्वा वैधर्म्यभेदो सामान्यादावित्यर्थः अभावे न भावाश्रय इति नन
न वैधर्म्येनापि तत्रान्योन्याभावः अभावे अभावानंगीकारात् तस्मात्तत्र स्वरूपमेव भेद इत्यर्थः तदेतत् दूषयति तन्नेति पदार्थमात्रानुगतत्वे
यतः केश्चिदुक्तं पदार्थयर्थं त्रितयमेव भेदः यथा घटादौ स्वरूपं अन्योन्याभावो वैधर्म्यं च सामान्यादौ तु द्वयमेव वैधर्म्याभावात् अभावे
स्वरूपमेव इतरासंभवादिति तन्न स्वरूपभेदस्यावश्यकत्वात् इतरयोश्च व्यभिचारात् भेदव्यवहारप्रयोजकत्वेनांगीकारवैयर्थ्या
८ त् एकाकारव्यवहारस्यैकरूपविषयसाध्यत्वनियमात् न च स्वरूपभेदपक्षे स्वस्मादपि स्वस्य भेदः स्यादिति वाच्यम् ॥ ७॥
नावश्यकत्वादिति हेतुमाह स्वरूपभेदस्येति ननु भेदव्यवहारोपपादकत्वं वैधर्म्यादीनां तुल्यं तत्कथं स्वरूपभेदस्यावश्यकत्वं इति तत्राह
इतरयोश्चेति अन्योन्याभाववैधर्म्ययोरंगीकारवैयर्थ्यात् अप्रयोजकत्वेन तिरस्करणीयाः इत्यभावे तथा च तद्रूपेणांगीकारो व्यर्थ इत्यर्थः तत्र हे
तुः व्यभिचारादिति सर्वत्राननुगतत्वादित्यर्थः ननु व्यभिचारेपि व्यवहारप्रयोजकं किं न स्यादिति तत्राह एकाकारेति यथा घटो यं घटो
यमिति व्यवहारे नुगते घटत्वं सामान्यमेव प्रयोजकं न व्यक्तिरननुगतत्वात् अन्यथा जातेरसिद्धिप्रसंगात् तथा चानुगतव्यवहारे प्रयोजकमनुग
तमेवेति नियतं एवं स्वरूपभेदस्य भेदव्यवहारविषयस्यानुगतस्य संभवेऽननुगतमन्यद्वैधर्म्यादि न तद्व्यवहारप्रयोजकं न युक्तमित्यर्थः ननु स्वरू
पभेदस्य न भेदव्यवहारहेतुता स्वरूपस्य भेदत्वे तत्र व्यवहारादर्शनात् अन्यथा स्वस्मादपि स्वस्य भेदः स्यादिति निरस्याह न चेति स्व
रूपमितरसापेक्षं भेदव्यवहारहेतुरिति प्रागेव निवेदितं ॥ ॥

सि॰
मु॰
८५

यत्तु स्वस्मादपि स्वस्य भेदापत्तिरिति तत्राह स्वस्येति॰ भेदस्य च धर्मिप्रतियोगिघटितत्वनियमादित्यर्थः नतु स्वरूपभेदयोरभेदे किं स्वरूपं भेदे
प्रविशति स्वरूपे वा भेद इति नाद्यः भेद इत्येव व्यवहारः स्यान्न स्वरूपमिति॰ न द्वितीयः भेदाकारप्रतीतेरभावप्रसक्तेः तत्राह नचेति॰ स
त्वमितरापरिशेष इति तर्हि किं परिशिष्यते स्वरूपमेवेत्याह भेदस्येति॰ कथं तर्हि भेदव्यवहार इति चेन्न धर्म्यादिसापेक्षस्य स्वरूपस्ये
व तदाकारव्यवहारहेतुत्वादित्यस्य सकृदावेदितत्वात् इममेवार्थं प्रकटयितुं परकीयं चोद्यमुत्थाप्य निरस्यति नचेति॰ ननु जन्यत्व
मेव जन्यस्य मायिकत्वसमर्पकमित्यत्र प्रपंचस्य मायिकत्वेन मिथ्यात्वे शास्त्रिरूपिते तत्र च प्रत्यक्षादिकं न प्रवर्त्तते सादिमात्रं सिद्धत्वा
त् कल्पितप्रतियोगिकभेदस्यापि कल्पितत्वेन प्रत्यक्षाद्यविषयत्वाच्च ततः कथं प्रत्यक्षादिबलेन नानात्मभेदो ब्रह्मात्मैक्यशंका

स्वस्य प्रतियोगिकोटिनिवेशेनास्य धर्मिणो विरहात् धर्मिकोटिनिवेशे वा प्रतियोगिनोऽभावात् न च भेदस्वरूपयोः परस्परांतर्भा
वे नान्यतरापरिशेषापत्तिः भेदस्य स्वरूपानतिरेकाच्च स्वरूपभेदः किं भिन्ने भेदव्यवहारप्रयोजकोऽभिन्ने वेति विकल्पावकाशः
उपस्थितवस्तुमात्रे धर्मिप्रतियोगित्वानापेक्षानपेक्षाभ्यां भेदाभेदव्यवहारयोर्जायमानत्वात् नन्वज्ञानकार्यत्वे प्रपंचस्य स्वर्वमु
अज्ञानकार्यत्वस्ये
व१सूत्र
कं तत्कथं प्रत्यक्षाद्यनुरोधेन भेदशंकेति चेत् न॰ तस्यैवासिद्धेः ब्रह्मकार्यत्वस्य बहुशः श्रवणात् ॥१०॥ ॥१०॥
अज्ञानकार्यत्वमेव १
त इति सिद्धांती शंकते नन्विति॰ अज्ञानकार्यत्वेऽजत्तत्वस्यान्मिथ्यात्वं तदेव प्रपंचस्यासिद्धं ब्रह्मकार्यत्वश्रवणात् ब्रह्मणश्च सत्यत्वे ८५
न तत्कार्यप्रपंचस्यापि सत्यत्वाविघातात् तथा च सत्यप्रतियोगिकभेदस्यापि सत्यत्वात् प्रत्यक्षादिविषयत्वं युज्यत इति प्रपंचभेदस्या ३२
त्मनि प्राप्तप्रवेश्यभिप्रायेण शूर्वपक्षी सिद्धांतिमतं दूषयति ननु स्यैवेत्यादिना ननु श्रुतिः प्रपंचस्य ब्रह्मकार्यत्वं प्रतिपादयत्यपि न तत्परा
न तस्य कार्यकारणं च वियते तेदं तद्ब्रह्मापूर्वमनपरमित्यादिविरोधादिति तत्राह बहुश इति॰ गतिसामान्यन्यायेनाभ्यासस्य तात्पर्यग्रा
हकत्वाच्च तस्य च प्रकृते सद्भावात्साध्यपवश्रुतेस्तात्पर्यग्रहणेन उदाहृतविरोधिवाक्यस्य स्वप्रदेशे दृहयाभावप्रतिपादकतयाप्युपपत्तेरिति

सदेवेत्यादिवाक्ये १
स्थूलत्वे २ ल.. २

असिसामान्यादिति शारीरकसूत्रे
अन्यासस्यापि तात्पर्यग्राहकत्वं निरू
पितं २

विषयोऽविषयश्चेत्येवं पूर्वपक्षसंशयो तदुभयोः संबंधे चैतेषां चाधिकरणं सिद्धांतितं त्रयतो वेदान्तवाक्यो विषयः तद्व्यतिरिक्त
वाक्योऽविषयः किं ब्रह्म न लक्षयति उत लक्षयतीति संदेहे न लक्षयतीति पूर्वपक्षे लक्षयत्युत्तरमिति ५

वत्कृशः श्रवणमुदाहरति सदेवेति · इदं परिदृश्यमानं जगदग्रे सृष्टेः प्राक् स्थूलरूपपरित्यागेन सदित्येवासीत् हे सौम्य प्रियदर्शने त्यर्थः ए
वमिति · यथा एकस्मादग्नेः क्षुद्रा अग्न्यवयवाः विस्फुलिंगा विविधं नानारूपं व्युच्चरंति उद्गच्छंति एवमेतस्माद्विज्ञानमयस्य प्राक्प्रत्यगात्मरू
पत्वस्माद्दात्मनः सर्वे देवाः प्राणादयोऽधिष्ठातारोऽग्न्यादयः लोकाः कर्मफलानि आत्मानः उपाधिसंपर्कजनितप्रवृत्तमानविशेषात्मानः इत्यर्थः
ब्रह्मणो जगत्कारणत्वं न केवलं श्रुतिसिद्धं किंतु युक्तितोऽपीत्याह जन्माद्यस्येति · अस्य जगतः प्रत्यक्षाद्युपस्थापितस्य जन्मस्थितिभ
गं यतः सर्वज्ञात् सर्वशक्तेर्भवति तद्ब्रह्मेति सूत्रार्थः अत्रेयमधिकरणरचना यतो वा इमानीत्यादिवाक्यं किं न ब्रह्म लक्षयत्युत लक्षयति
लक्षयतीति एकस्याभयहेतुत्वसंभवासंभवाभ्यां संदेहे श्रुतेरनुमानानुगुण्यादेकस्योभयहेतुतायां दृष्टांताभावेनाशक्यानुमानत्वात
एकेतरहेतुत्वस्य च लक्षणत्वे वस्तुपरिच्छेदात् लक्ष्यस्याब्रह्मत्वात् न लक्षयतीति प्राप्ते पुरुषमतिप्रभवत्वेनानुमानस्य संभावितदोषस्या
सदेव सौम्येदमग्र आसीत् यतो वा इमानि भूतानि जायंते तस्माद्वा एतस्मादात्मनः आकाशः संभूतः यथाग्नेः क्षुद्रा विस्फुलिंगाः
व्युच्चरंति एवमेतस्मादात्मनः सर्वे देवाः सर्वे लोकाः सर्व एत आत्मनो व्युच्चरंतीत्यादिश्रुतिभ्यः जन्माद्यस्य यतः इतिन्यायाच्च न
न्वज्ञानकार्यत्वमपि वद्भूयश्रूयते मृत्युनैवेदमावृतमासीत् तद्धेदं तर्ह्यव्याकृतमासीत् इंद्रो मायाभिः पुरुरूप ईयते ॥१०॥
पौरुषेयत्वेनापास्तदोषागमानुग्राहकतर्कत्वादतींद्रियार्थे स्वतः प्रमाणत्वादागमिकोभयहेतुत्वे सत्त्वादिदृष्टांतेन संभावनामात्रहेतुत्वा
द्वस्तुतोऽपरिच्छेदात् लक्ष्यस्य ब्रह्मत्वसिद्धेर्जगन्निमित्तोपादानं सच्चिदानंदं ब्रह्मेति लक्षयतीति सिद्धांत इति ननु यथा प्रपंचस्य ब्रह्मकार्य
त्ववादिन्यः श्रुतयः संति तथाज्ञानकार्यत्ववादिन्योऽपीति शंकते नन्वज्ञानेति मृत्युनेति · साभासाज्ञानेन मृत्युः तद्धेदमिति · तदिति वि
नाव स्थं जगदुच्यते पेति प्रयोगे इदं शब्दः इदमिति व्याकृतावस्थं तदिदंशब्दयोः सामानाधिकरण्यात्परोक्षापरोक्षावस्थस्य जगत एक
त्वमवगम्यते तदिदं जगदव्याकृते साभासाज्ञानात्मकमेवासीदित्यर्थः इंद्रेति · इंद्रः परमेश्वरो मिथ्याभिमानैर्न तु परमार्थतः पुरुरूपो ब
हुरूप ईयते गम्यते इत्यर्थः ननु मृत्यु अव्याकृतादिशब्दाः नाज्ञानमात्रवाचकास्तेषामज्ञानात्मोपस्थापकत्वादित्याशंक्य साज्ञानमाया

ब्रह्मण उपादानत्वे निमित्तत्वे च ५

उपादाननिमित्तत्वे ब्रह्मणः उपादानत्वे निमित्तत्वस्य वा १

तदस्य लक्षणं २

२

सस्थूलरूपं २

श्रीसदानंदकृतवेदान्तसारवृत्ति ॥११॥

तत्रैव तु मार्गः

भि सू ९९ शारीरके २

मायांत्वित्यादिना॰ प्रकृतिरुपादानंतामित्यर्थः कारणकार्ययोः साम्यादित्यभिप्रायः नासदासीदिति॰ असद्भावः सद्भावः तदुभयम
पिनासीत् तमएवासीदिति॰ तमः शब्दश्चाचरणप्रधानात्तानवाचकइति एकाश्रयविषयमितियावत् पूर्वोक्तेर्थेश्रुतेरनुग्राहकंश्रुति
मप्याह मायामात्रमिति॰ उत्तरतंत्रेत्तृतीयेस्थितेअत्रेदंविषयवाक्यमामनंति सयत्रप्रस्वपितीत्युपक्रम्यनतत्ररथानरथयोगाइत्यादि अध्याये २
वाक्यंतत्र संशयः किंप्रबोधएवस्वप्नेपिपारमार्थिकार्थक्रियासमर्थासृष्टिरुतमायामयीप्रातीतिकसत्तामात्रोपेताइति किंतावत्प्राप्तं
पारमार्थिकीति अतः श्रुतिप्रामाण्यात् अथरथान्रथयोगान्पथः सृजतइतिश्रुतेः रथादीनांसृष्टिरत्रस्वप्नेप्रतीयते ततश्चश्रु
तिप्रामाण्यात् पारमार्थिक्येवसृष्टिरितिपूर्वपक्षेसिद्धांतयतिमायामात्रमित्यादिना तुशब्दः पूर्वपक्षंव्यावर्तयति नैतदस्तिस्वप्नेसृ
ष्टिः पारमार्थिकीतिकीदृक् तर्हिसृष्टिस्तत्राह मायामात्रमिति मायैवसृष्टिः नपरमार्थगंधोप्यस्तीत्यर्थः अतः कार्त्स्न्येनानभिव्य
मायांतुप्रकृतिंविद्यात् नासदासीन्नोसदासीत्तमआसीदित्यादिश्रुतिभ्यः मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति
न्यायात् च एवंतर्हिश्रुतीनांपरस्परंविरोधान्नोभयमपिकारणमस्तुकिंतर्हिजगत्कारणमितिचेन् यथायोग्यंपरमाण्वादिक॰ ॥५९॥
क्तस्वरूपत्वात् नहिकार्त्स्न्येनपारमार्थिकवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नइति अतएवस्वप्नसृष्टिश्रुतिर्नपारमार्थिकीसृष्टिमाह न
तत्ररथाइत्यादिनास्वप्नसृष्टिश्रुतिविषयाणांरथादीनांस्वप्नेनिषेधाच्चनसासृष्टिः पारमार्थिकीकिंत्वविद्योपादानैवेति अत्रतट
स्थः शंकते एवंतर्हीति॰ कथंतर्हिनिः कारणंकार्यस्यादितिशंकते किंतर्हीति॰ कारणांतरस्यसत्वात् ननिः कारणंकार्यमि
तिपरिहरति यथायोग्यमिति॰ स्वस्वसिद्धांतेयादृक्कारणंभवितुंयोग्यंपरमाण्वादितादृगस्त्येवइत्यर्थः तत्रत्रसरेणुस्तावदार
ब्धः महत्वेसतिद्रव्योपादानत्वात् कपालादिवदितित्रसरेणोः कार्यतासिद्धाएवंतदवयवेष्वप्यूह्यं तथाचविवादास्पदीभूतंकार्य
द्रव्यंत्रसरेण्ववयवान्स्वपरिमाणादणुतरपरिमाणारब्धंकार्यद्रव्यत्वात्समतवदितियएवव्द्यणुकपरिमाणो[redacted]
[redacted]पेक्षयान्यूनपरिमाणोद्व्यणुकारंभकः सएवपरमाणुर्जगतोमूलकारणमितिवैशेषिकादयोमन्यंते एवंप्रधानादिवादेप्यूह्य

व्यणुकादेः २

सिद्धान्तप्रकाशः ॥ ११ ॥ ९९

एवं प्रपंचस्य परमाण्वादिजन्यत्वप्रकृतोपयोगमाह तस्मादिति· यस्मात्तस्योपादानस्य सम्मतात् पृथिवीकार्यस्य पृथ्वीत्ववत्तस्यं च परमाण्वादितत्तसद्रूपादा नप्रपंचोपि सत्य एव तस्मादनात्मप्रतियोगिकेभेदे प्रामाणिके सति कथं सर्वाद्वैतमित्यर्थः एवमनात्मभेदं पूर्वपक्षे पूर्वपक्षेउपपाद्य तन्निराकरणं प्रति जानीते मैवमिति· ननु किमिति प्रकृतस्याभिप्रायापरिज्ञाने श्रुत्यर्थाभितेनत्वया संसारधर्मेभ्यो निःकृष्टस्य तत्कर्तृत्वादिभ्यो निःकृष्टेनेत्यत्र संसारधर्मादीनां

तत्त्वपदयोः ४ पृथगवस्थितस्याभिधानादितितत्राह नहीति· कथं तर्हि तयोरभेदो बोध्यत इति जिज्ञासायामाह किं त्विति· जिज्ञासितं स्वरूपमुपपादयति प्रत्य गिति श्रुद्धान्तःकरणेनावधारयतीत्यन्वयः तत्र वाक्ये योग्यतां संपन्नपेपदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्येति मत्वा नत्त्वंपदार्थशुद्धिप्रकारमाह जागरित्यादिनेति निष्कृष्टस्य तत्तेनेनुविज्ञानं व्यावर्त्तयति प्रत्यगिति· सर्वान्तर इत्यर्थः एतेन विशेषणेन सात्विसाद्यान्वयव्यतिरेकौ सूचितौ अवस्थादीनां मध्यस्यत्वद्योतयितुमपि करणं विशिनष्टि कूटस्थ इति· अविकारिणीत्यर्थस्तेन वस्तुतो विकाराभावात् अज्ञानदशायां वा साकारत्वेत्यर्थः एतेनका

तस्मादनात्मभेदप्रत्यक्षादिसिद्धे जागरूके कथमद्वैतसिद्धिः तदयं संग्रहः आत्माभेदप्रमित्यापिनाद्वैतं तत्ते प्रसिद्ध्यति अनात्मभेदसंसिद्धेः प्रत्यक्षादेः प्रमाणतः ॥१॥

मैवं प्रकृतस्याभिप्रायापरिज्ञानात् त्वद्धितत्वमस्यादिश्रुत्या नात्मानं पृथक् स्थापयित्वा शुद्धाशयोरभेदो बोध्यत इति प्रकृतिस्याभिप्रायः किन्तु प्रत्यक् चैतन्ये कूटस्थे जागराद्यवस्थात्रयम कर्तृत्वाद्यनर्थजातं च व्यभिचारि सर्वतत्रैवानुगते साक्षिणि एषां ध्यस्त इत्यन्वयव्यतिरेकाभ्यां तद्व्यतिरेकेणतत्स्वरूपं नास्तीति निश्चित्य शुद्धेन प्रत्यगात्मना ब्रह्मणो भेदसिध्यर्थं ब्रह्मण्यपि जगत्कर्तृत्वं परोक्षत्वादिरकाशादिकं च जगज्जा

ड्यकारणान्वयव्यतिरेकौ सूचितौ दुःखित्वप्रेमास्पदत्वाख्यान्वयव्यतिरेकं सूचयितुं विशिनष्टि अनर्थजातमिति· व्यभिचारीति व्यभिचार्यनुगतत्वात्वान्वयव्यतिरेकसूचनाय विशेषणं सर्वपदं पूर्वोक्तमुपस्थापयति तत्रैव कूटस्थ इत्यर्थः तस्याधिष्ठानयोग्यतामाह अनुगत इति· स्वसत्ताप्रदेस्फूर्तिप्रदत्वमुपपादयितुं विशिनष्टि साक्षिणीति· एतच्च विशेषणद्वय अन्वयाद्युपपादनेप्युपयुज्यत एव उपलक्षणं चैतत्परप्रेमास्पदत्वस्यापि बोद्धव्य अध्यस्तत्वस्य फलमाह इतीति· इतिशब्दोद्देशो यतो ध्यस्तमतस्तदधिष्ठानमुक्तं चैतन्यं तद्भेदेन स्वातंत्र्येणेति यावत् तस्याध्यस्तस्य स्वरूपसत्ता नास्तीति निश्चित्यावधारयतीत्यन्वयः तदवधारणप्रयोजनमाह शुद्धेनेति· ब्रह्मण्यपीति अपिशब्दः प्रत्यक् चैतन्यपरामर्शार्थः पूर्वोक्त चतुर्विधान्वयव्यतिरेकसिद्धये विशिनष्टि अननुगतमित्यादिना ॥०॥

परशब्दोऽत्र विशेषार्थः तेन परा
कृत्स्नाहेत्यर्थः २

अधिष्ठानं शून्यमिति बौद्धमतं परिहरति सदिति· स्फूर्तिस्वरूपप्रदर्शनाय विशिनष्टि अधिष्ठानं चिदात्मनीति· अधिष्ठानभेदेनासत् तस्य प्रमाणागम्य
त्वमाह भ्रान्त्यैवेति· इत्थं भावे तृतीया तदात्मनैव प्रतिपन्नं अत एवाह असदिति· वस्तुतो सदित्यर्थः अवधारणक्रियायां साधनमाह इत्यन्व
येति· चतुर्विधान्वयव्यतिरेकाभ्यामित्यर्थः अन्वयव्यतिरेकयोस्तर्कत्वेन संभावनामात्रहेतुत्वेपि अप्रमाणत्वादवधारणहेतुत्वं न संगच्छत
इत्याशंक्याह नेतीति· ननु निषेधः प्राप्तिपूर्वकस्तदभावे कथं स इति तत्राह स्पष्टीति· तर्हि प्रामाणिकत्वान्न निषेध इति चेत् न अविद्या
प्रत्युपस्थापितानुवादत्वात् किमर्थं तर्हि श्रुतिरनुवदतीति चेत्तत्राह अध्यारोपेति अवस्थानानात्वकर्तृत्वस्य प्रत्यगात्मनि ब्रह्मणि च जग
त्कर्तृत्वादेश्चाध्यस्तत्वनिश्चयस्य फलमाह ततइति· ततो गुरुमुपसर्पतीत्यन्वयः ततः कर्तृत्वादिप्रपंचस्य कल्पितत्वज्ञानानन्तरमित्यर्थः
ननु गुरूपसर्पणं निश्चयार्थं स चेदुक्तविधयाजातः किं तदुपसर्पणेन तत्राह संदिहान इति· संदेहहेतुमाह शुद्धयोरिति· ननु तत्त्वंप

अनुगतेनास्मिन्नखिलात्मन्यध्यारोपितमसत् भ्रान्त्यैव प्रतिपन्नमित्यन्वयव्यतिरेकाभ्यामध्यारोपापवादन्यायमाश्रित्य प्रवृत्तं स्पष्टीवाक्यस
मनेन तत्प्रवृत्तं नेनेतिनेतीति वाक्येन चावधारयति ततः शुद्धयोस्तत्त्वंपदार्थयोः लक्ष्यांशयोर्निरस्तसमस्तानात्मसंबन्धयोर्भेदेऽभेदे वाप्र
माणमपश्यन् संदिहानः संसाररोगग्रस्तानुचरगर्भवासाद्यनेकोभासमुद्भूतदुःखव्रातानुभवासादितोद्वेगः ब्रह्मलोकप्रभवम
पि सर्वं विषमिव मन्यमानः ॥७॥ राम ॥७॥

दार्थयोर्भेद एव प्रमाणं दृश्यते नाहमीश्वर इत्यादि तत्राह लक्ष्यांशयोरिति· कोवा लक्ष्यांश इति तत्राह शुद्धेति· शुद्धत्वमुपपादयति निरस्ते
ति· प्रत्यक्षादेरनात्मविषयत्वादात्मभेदग्राहकत्वेनयुक्तमिति भावः ननूक्तयुक्त्यैव भेदकाऽनात्मसंबन्धस्यात्मन्यध्यस्तत्वनिश्चयेनाभावात्
भेद एवात्मब्रह्मणोर्भविष्यतीति तत्राह अभेदइति· युक्तेस्तर्कत्वेन स्वातन्त्र्येण प्रमाणत्वान्नाभेदप्रमापकत्वं तस्या इति ननु प्रमाणं दर्श
नमसिद्ध अधीतवेदस्यैवाधिकारादिति तत्राह संदिहान इति यद्यपि गृहीतपदपदार्थसंगतिनाश्रुतः शब्दोऽर्थप्रत्यायक एव तथापि
असंभावनाग्रस्तादिषयत्वात् तत्र शाब्दप्रत्ययः प्रतिष्ठां न लभत इति न तत्र प्रमाणत्वेन व्यवह्रियत इति भावः एतेन नित्यानित्यवस्तुविवे
कः स्यपिकारिविशेषणमर्थात्रिरूपितं इदानीं वैराग्यमधिकारिविशेषणं तदाह संसारेति· ननु तथापि गुरूपसदनमनुपपन्नं तदुपस

सि॰ मं॰ ८

ब्रह्मविचारपर्यन्तपर्यालोचनयात्र ... ति किंचित्संभवति तत्राह
प्राप्नोति ॥८॥

दनस्य संसारनिवृत्तिहेतुत्वात् नत्वाचार्योऽद्वैतविद्यायाः निवृत्तेः संसारनिवर्तकज्ञानहेतुत्वं ३
इष्यते ... तात्पर्यकत्वेन प्रमाणभावादित्याशंक्याह तरतीति त
संसार ९

८८

परमंपवित्रंशिवंब्रह्मात्मैकंतत्पदपरोक्तत्तानेऽक्तः तथाच यस्येच्छामपवर्गेतेनाप्यइतिभावः श्रोत्रियंब्रह्मनिष्ठंगुरुंइतिश्रुतिमाश्रित्यगुरुंविशिनष्टि श्रुप
रोक्षेति उपसर्पतीत्यत्रशास्त्रोक्तविधिनाइतिशेषः गुरुकृत्यमाह तेनेति वाक्यप्रमाण्यमुपपादयति नित्यनिर्दोषेणेति यद्यप्यस्मन्मतेवेदस्यापि
कल्पितत्वान्ननित्यत्वं तथाप्यबुद्धिपूर्वकत्वात्प्रयत्नाजन्यत्वात् नित्यत्वोपचारः श्रात्मबुद्धेःअपिसाहाय्यंदर्शयति स्वयमेवेति साक्षात्कृतेत्य — हे
नेतरमानेहाप्यावरकमतानंसविलासंबाधित्वेतिचपदंज्ञेयंतत्फलमाह स्वानंदेति ततश्चसर्वभेदोक्केदात्सर्वाद्वैतमेवतत्त्वमस्यादिवाक्यादव
अवदर्शि — गम्यमित्यभिप्रायः सिद्धइति उपसंहरति यत्तुपूर्वपक्षेस्वरूपभेदः प्रत्यक्षादिगोचरइतितन्निराधात् नवेदांतप्रामाण्यमिति तद्दूषयितुम।
नुवदति यद्येति असहिषयत्वेनेति पराञ्चिखानीतिश्रुतेः प्रत्यक्षादेरनात्मविषयत्वमित्यर्थः स्वरूपस्यसद्रूपत्वेनात्मत्वान्नतदात्मनिभेदे — स्वरूपात्मनि २

तरतिशोकमात्मविदितिश्रुत्यासंसारदावानलप्रसूतसंतापशमनामृताब्धिमात्मविद्यामजानानः परमजिज्ञासुः स्वरूपापरोक्षदर्शि
नेपरमकारुणिकंगुरुमुपसर्पतितेनचशुद्धयोस्तत्त्वपदार्थयोरभेदेतत्त्वमस्यादिवाक्येननित्यनिर्दोषेणबोधितेस्वयमेवाद्वैतत
त्वेसाक्षात्कृतेसस्वानंदरसः श्रात्मारामोभवति अतःश्रुत्यभिप्रायापरिज्ञानविजृंभितमेतत् यदनात्मभेदेनाद्वैतक्षतिरितियच्चा
स्वरूपभेदःप्रत्यक्षादिगोचरइतितदतितुच्छंप्रत्यक्षादेरसहिषयत्वेनस्वरूपागोचरत्वात् स्वरूपस्यभेदत्वानुपपत्तेश्चउक्तंइतिचेत् श्रु
णुकिंशुद्धंसर्वधर्मविनिर्मुक्तंस्वरूपंभेदः किंवाविशिष्टं आद्येव्यवहारेणतत्त्वमपितस्यनास्तीतिवक्तव्यम् ॥०॥

प्रत्यक्षादिप्रवृत्तिनिर्मुक्तइतिभावः ननुसर्वप्रत्ययवेद्यंस्वरूपमितिभवतोमतंतत्कथंतस्यप्रत्यक्षाद्यविषयत्वमित्याशंक्याद्वैतंतरमाह स्वरूपा
स्येति स्वरूपस्यशुद्धत्वमुपाध्यसंस्पृष्टत्वंविशिष्टत्वमुपाधिसंबंधकत्वं आद्यइति शुद्धस्वरूपमेवभेदइतिपक्षेइत्यर्थः व्यवहारेति अयमर्थः
तावत् ब्रह्मणिनस्वाभाविकोधर्मोस्ति अविकारिस्वभावत्वात् औपाधिकस्तूपाधिअसंस्पृष्टेनसंभवति इतिशुद्धपदमहिम्नानिर्द्धर्मकत्वंवक्त।
व्यत्वेनप्राप्तं तथाचव्यवहारविषयत्वमपिनास्तीतिवक्तव्यं तथाहि व्यवहारोहि अभिवदनंवाअभिज्ञावानाद्यः धर्ममादायैवप्रवृत्ति — आभिवदनंप्राप्य प्रवृत्ति २
स्तदभावेकथंस्यात् स्वप्रकाशत्वादेवनद्वितीयः ततोव्यवहारानास्पदंस्वरूपंवक्तव्यमिति ॥ ९ ॥०॥

व्यवहारोहिद्विविधः नामव्यवहारो
रूपव्यवहारश्चेति २

भेदग्राहकत्वाभ्यत्वेन प्रत्यक्षादिव्यवहारविषयत्वे २

अध्यारोपापवादार्थकत्वात् १

सि मु ९८ अस्त्वेवं किं ततस्तत्राह तथा चेति नन्वस्थूलमित्यत्र नञः प्रसज्यार्थकत्वादभावरूपतां ब्रह्मणः स्यादिति नेत्याह सदात्मकमिति कल्पितस्य स्थू
लत्वादेरधिष्ठानभेदेनासत्त्वात् सदभावस्वभावत्वात् सदात्मकं ब्रह्मैवेत्यर्थः नामांतरेणेति भेदः प्रत्यक्षादिगोचर इति वदता भेदस्योक्तस्वरूपात्म
कब्रह्मानतिरेकात् ब्रह्मैव भेद इति संज्ञांतरेण प्रत्यक्षादिगम्यमित्युक्तं स्यात् तथा च नानिष्टापत्तिरिति भावः ननु कथमपि प्रपंचभेदः प्रा शुद्धस्य व्यवहार विषयत्वेनति
माणिकः स्यात् तावताप्यस्मदिष्टसिद्धिरित्याशंक्याह नचेति भेदस्तावदतिरिक्तस्यैवनस्वीक्रियते ब्रह्मात्मकत्वे तस्य स्वप्रकाशत्वात् प्र छापत्तिः २
त्यक्षादिविषय त्वनिषेधाच्च न भेदस्य ब्रह्मस्वरूपत्वेनापि प्रामाणिकता इत्यर्थः सर्वप्रत्ययवेद्यत्वमुपदितेपवनश्रुद्ध इति भावः विशिष्टा विशिष्टे १

नचकुषेस्यादिना २ भेदग्राहकत्वाभ्यत्वेन १ स्य

तथा च सर्वव्यवहाराणामास्पदं सर्वधर्मविनिर्मुक्तमस्थूलानण्वादिशास्त्रसिद्धं सदात्मकं ब्रह्मैव नामांतरेण प्रत्यक्षादिगोचर इत्युक्तं स्यात्
नच तदप्युपपद्यते न चक्षुषा गृह्यते नैव वाचा नान्यैर्देवैस्तपसा कर्मणा वेत्यादिश्रुतिविरोधप्रसंगात् द्वितीये विशेषणविशेष्य
योर्भेदे विशिष्टस्वरूपांतरं भेद इति वाच्यं तथा च तत्राप्यन्यस्तत्राप्यन्यस्तत्राप्यन्य इति सैव दुरुत्तराऽनवस्था अभेदे वा विशिष्टस्वरूपा
सिद्धिः नवा विशिष्टस्वरूपं प्रत्यक्षादिगोचरः तस्यापि शुद्धवस्तुस्वरूपवद्विधर्मिकत्वात् नहि रूपाद्विशिष्टरूपादयः संति नच वि
शिष्टं नाम किंचिदस्तीति विशेषणविशेष्यतत्संबंधातिरिक्तस्य तस्याननुभवात् ॥९॥ (स्वरूपमेव तर्हि भेदोस्तु तत्रोक्तदोषाप्रसं
गादित्याशंक्य द्वितीयमनुवदति द्वितीयेति विशिष्टस्वरूपं भेद इति पक्षेपीदं विवेचनीयं विशेषणविशेष्ययोर्भेदे सति विशिष्टस्वरूपांत
रं विशेषणादिभेदादन्यदिति वक्तव्यमुत विशेषणादिभेदाभाव एव विशिष्टस्वरूपं भेद इति वक्तव्य इति विकल्पाद्यमनुवदति विशेषणेति
आद्यपक्षमंगीकारयित्वा दूषयति तथा चेति विशेषणविशेष्यभेदो विशिष्टस्वरूपभेदोपपादकः किं विशिष्टभेद एव उत भेदांतरं आ
द्ये आत्माश्रयः द्वितीयेऽन्योन्याश्रयः अथ विशेषणविशेष्यभेदोपपादकस्तृतीय एव विशिष्टभेदः स्वीक्रियते तदा चक्रकं चतुर्थेऽनवा
स्था इत्यर्थः द्वितीयपक्षं दूषयति अभेदे वेति विशेषणविशेष्ययोरभेदे अन्यतरपरिशेषाद्विशिष्टस्वरूपासिद्धिरित्यर्थः विशिष्टस्वरूपा
त्मकत्वे भेदस्य प्रामाणिकत्वं न स्यादिति हेत्वंतरमाह नचेति किंच विशिष्टस्वरूपं किल भेदः तत्र विशिष्टं विशेषणादिभ्योऽन्यदुताऽनन्यत् आ

॥९॥ नचेति ९८ [illegible]

द्वितीयं द्विधा विकल्प्य दूषयति नेषां चेति । विशेषणविशेष्यसंबंधानां प्रत्येकं विशिष्टत्वे केवलदंडेऽपि विशिष्टव्यवहारः स्यात् नच सोऽस्ति केव-
विशिष्ट २ लस्य दंडे स्यात्तद्व्यवहाराजनकत्वात् एवं विशेष्यसंबंधयोरप्यूह्यं समुदायः किमेभ्योऽतिरिक्तरूप उतैव वा आद्ये दूषणं पूर्वमुक्तं द्वितीये प्रत्येकं तद्व्यवहा-
रापत्तिः तर्हि पूर्वोक्तदोषापत्त्या त्रये विशेषणविशेष्ययोः संबंध एव विशिष्ट इति नेत्याह नचेति । किं विशेषणादिव्यावृत्तः संबंधो विशिष्ट उत त-
दुपलक्षितः आद्यनिरासे हेतुमाह विशेषणेति । अपिशब्दो विशेषणादिदृष्टान्तार्थः द्वितीयं दूषयति विशेषणेति । तद्व्यवहारो विशि-
ष्टप्रयुक्तव्यवहार इत्यर्थः तर्हि देवदत्तगृहदृष्टप्रयुक्तो व्यवहारो गृहोपलक्षणो काके दृश्यते किं च स्वरूपं भेद इति वदन् प्रष्टव्यः किमस्वरूपप्रतियो-
गिकः उत स्वरूपप्रतियोगिकः नाद्यः निःस्वरूपस्य तुच्छत्वेन तत्प्रतियोगिकस्य भेदस्यापि तुच्छत्वापत्तेः द्वितीयं दूषयति नवेति । अयमर्थः
स्वरूपप्रतियोगिको भेदः किं प्रतियोगिन एव स्वरूपं उत धर्मिणः नाद्य इत्याह नाशेति नचहेतु । नत्येति भिदिर्विदारण इति स्मृतेरित्यर्थः एतदे-

नेषां च प्रत्येकसमुदायाभ्यां विशिष्टव्यवहाराजननात् न च संबंध एव विशिष्टं विशेषणविशेष्यतत्संबंधा इत्यत्र संबंधेऽपि तद्व्यवहारादर्शना- नाशरूप
त् विशेषणविशेष्ययोस्तद्व्यवहाराभावप्रसंगाच्च नच वस्तुस्वरूपं भेद इति शंकितुमपि शक्यं तस्य विदारणात्मनो वस्तुस्वरूपत्वात्
नाशात्तत्प्रतियोगिनोरभेदासंभवात् नहि घटविदारणं घटस्वरूपं वस्तुस्वरूपातिरिक्तस्य च भेदस्य तत्त्वे निःस्वरूपस्य निराश्रयस्यासिद्धि-
रेव तर्हि भिन्नमाश्रयमाश्रयो भवति अन्यथाध्वस्तोऽपि घटो जलाधारः स्यात् अभिन्नत्वाश्रये भेदो विरोधादेव न वर्तते ॥०॥

वक्ष्यति नहीति । नहि द्वितीयः स्वरूपत्वस्य प्रतियोगितावच्छेदकत्वेन तदनधिकरणस्य धर्मित्वेन निःस्वरूपत्वादाश्रयत्वानुपपत्तेः अथ स्वरूपभेदेन
स्वरूपत्वं प्रतियोगितावच्छेदकं किंतु वैधर्म्यं स्वरूपभेदस्य सर्वत्र वैधर्म्यव्याप्तत्वादिति चेत् न । वैधर्म्यं हि तद्वृत्तित्वे त[illegible]तरशाखार्थभेदज्ञानाधी- सन्निनद्वित
नज्ञानं प्रतियोगितावच्छेदकज्ञानाधीनं च भेदज्ञानं तथा चान्योन्याश्रय इति अथैतद्दोषपरिहाराय वैधर्म्यापादकधर्मभेद एव कश्चित्स्वरूप- राह्नन्तित्वे
भेदादन्यः स्वीक्रियते तर्हि स किं भिन्ने आश्रये वर्तते उताभिन्ने इति । आद्यं दूषयति वास्त्विति । स्वरूपभेदादन्यस्मिन् धर्मभेदः तर्हि निःस्वरूपः स्या-
सं॰ त् भिन्नस्य द्विधाभूतस्य चाश्रयत्वानुपपत्तेर्निराश्रय एवं इति तेन निरूपणाय धर्म इतीत्यर्थः निराश्रयत्वमुपपादयति तद्धीत्यादिना द्वितीयं दूषय-
ति अभिन्नेत्विति । किं च घटप्रतियोगिको भेदो घटस्वरूपं धर्मो वा आद्ये घटप्रतियोगिकभेदस्य घटस्वरूपत्वे घटाद्विहतप्रसंगः घटधर्मत्वे पटोऽपि घट-
धर्मतामियात् ॥०॥ ०॥ रामायनमः

सि
मु॰
९४

किंचस्वरूपस्याभेदत्वे संशयाद्युक्तेरप्रसंगः इत्यादिदोषमभिप्रेत्याभेदद्दूषणमुपसंहरति तस्मादिति सर्वथेति॰ स्वरूपधर्माभेदपक्षेपीत्यर्थः किंच आ
विद्यकप्रपंचस्य साक्षिमात्रसिद्धस्य प्रमाणायोग्यत्वात् तत्प्रतियोगिकभेदस्य कल्पितत्वान्न पारमार्थिकाद्वैतहतिः नच प्रपंचस्य ब्रह्मकारणत्वं अ
विद्योपादानत्वप्रतिपादकवाक्यविरोधात् तर्हि ब्रह्मकारणत्वप्रतिपादकवाक्यविरोधात्तोभयमपि कारणमिति यदुक्तं तदनूद्य दूषयति यदुक्तमित्यादि
ना तन्नेति॰ नेतिप्रतिज्ञायां हेतुमाह ब्रह्मेति॰ अज्ञानमेव जगदुपादानमित्यर्थः ननूभयत्रकारणत्वप्रतिपादकवाक्यसद्भावे कथमयं नियमस्तत्राह
ब्रह्मणइति॰ अविकारित्वादित्यर्थः सदेव सोम्येदमग्र आसीदित्यादिवाक्यानां ब्रह्मकारणत्ववादिनां गतिमाह अधिष्ठानत्वेति॰ जगदुपादानमा
याश्रयत्वमात्रेणेत्यर्थः येनाकं व्याचष्टे दृश्यत्वादीति जगतोऽविद्यैव कारणमित्यन्वयः नन्वविद्यानामविद्याया अभावः स च न जगदुपादानं तत्का
र्यस्याभासत्वात्तत्राह अनिर्वचनीयेति॰ सदसद्विलक्षणेत्यर्थः जगदुपादानत्वसिद्धये विद्यां विशिनष्टि अनादीति ननु तथापि जगतः सत्त्वेन प्र

तस्मादलमनेनानात्मविचारेण सर्वथाप्यत्यन्तादेरात्मानात्मभेदगोचरत्वं नास्तीति सिद्धं यदुक्तं जगत्कारणत्वविषययोः श्रुत्योरज्ञानब्रह्म
गोचरयोः मिथोविरोध इति तन्न ब्रह्मज्ञानाज्जगज्जन्म ब्रह्मणोऽकारणत्वतः अधिष्ठानत्वमात्रेण कारणं ब्रह्म गीयते १८ दृश्यत्वाद्यनुमा
नसिद्धानिर्वचनीयस्य जगतोऽनाद्यनिर्वचनीयाविद्यैव कारणं न ब्रह्म तस्य कूटस्थस्य कार्यकारणविलक्षणत्वात् तदेतत् ब्रह्मापूर्वमन
परमनंतरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूरिति श्रुतेः ॥०॥

तीतेः सद्विलक्षणाविद्याकथं तदुपादानं तत्राह अनिर्वचनीयस्येति॰ तत्र प्रमाणमाह दृश्यत्वादिति॰ विमतं सद्विविक्तं दृश्यत्वात्परिच्छिन्नत्वा
त्स्वप्नवदित्यर्थः अपरोक्षत्वाच्च नासत् ततः सदसद्विलक्षणमनिर्वचनीयं जगदित्यर्थः तथा च अनिर्वचनीयस्य जगतोऽनिर्वचनीयमज्ञा
नमेवोपादानं युक्तं कार्यकारणयोस्तुल्यरूपत्वादित्यर्थः एवकारव्यावर्त्यमाह नब्रह्मेति॰ ननु श्रुत्या पदवेत्कारणता बाध्यते कथमात्मा तद्वि
लक्षणः तत्राह तदेतदिति॰ तदेतदज्ञानादिविषयं जगत् ब्रह्मैव न जगतो रूपांतरमस्तीत्यर्थः अपूर्वमकार्यं न विद्यते अपरं कार्यं यस्य तदनप
रं अकारणमित्यर्थः न सामान्यं ब्रह्म इत्याह अनंतरमिति॰ तर्हि विशेष इति तत्राह अबाह्यमिति अव्याहृतानुगतमित्यर्थः तस्य परोक्षत्वं
निरस्यति अयमिति॰ अपरोक्षमित्यर्थः आत्मनः संसारित्वव्यावर्त्तनायाह ब्रह्मेति॰ आत्मानं विशिनष्टि सर्वानुभूरिति॰ सर्वात्माविदा
त्मत्वादनुभूरिति ॥०॥ ०॥

गवत्वादिति
पाठोवा १

९४

इति शब्दः पूर्वपरामर्शार्थः पूर्वोक्तं विज्ञानं कर्तव्यमिति ॥ वेदाज्ञानदुःखं च नेसंसारानर्थप्रसक्तिः तत्कारणो चात्मनः कूटस्थत्वेत्यर्थः कूटस्थत्वा
त्कारणत्वस्य च श्रुत्यानिषिद्धत्वात् कारणत्वश्रुतेः जगदुपादानाज्ञानाधिष्ठानत्वेनाप्युपपत्तेः नब्रह्मकारणं किं त्वज्ञानमेवेत्यर्थः ननूपचरि
तमपि कारणत्वं किमिति श्रुतिवक्ति निःप्रयोजनत्वात् तत्राह ब्रह्मेति॰ अन्यार्थत्वं स्पष्टयति एकमेवेत्यादिना तस्यारंभेनेन॰ ननु सर्वेषां वेदा
न्तानां ब्रह्मपरत्वं समन्वयार्थः तत्र वेदान्तैकदेशस्याज्ञानकारणपरत्वे कथं नापसिद्धान्तस्तत्राह नचेति॰ किमर्थं तर्हि श्रुत्योच्यत इति
तत्राह तस्येति॰ कारणत्वस्येत्यर्थः स्वप्रकाशानंदचिदात्मनो नानादुःखित्वप्रकाशत्वादिरूपेण प्रतिभासो भ्रमः तन्निमित्तत्वेनाज्ञानकारण
वाद इत्यर्थः तदुक्तं विषयकारणदोषात्तु भ्रमः संविदि स्यादपि तु भवति मोहात् केवलादेवमेव भगवति परमात्मन्यद्वितीये विविन्नाद्वयमति
विभ्रमस्तु भ्रांतिरज्ञानदृष्टेरिति किमिति मुख्योपादानकारणता श्रुतेः प्रत्याख्यानिमित्तमात्रपरताकल्प्यत इति तत्राह कार्येति॰ सदसतोः

विद्या

कथं तर्हि ब्रह्मणो जगत्कारणत्वं श्रुतौ प्रसिद्धं जगत्कारणाधिष्ठानत्वेन कारणत्वोपचारात् ब्रह्मकारणश्रुतेः अन्यार्थत्वाच्च एक
मेवाद्वितीयमिति श्रुतेरद्वितीयत्वं तावत् ब्रह्मणः सिद्धं तत्कथं संभाव्यतां इति कार्यकारणयोरभेदस्तावत् लोकप्रसिद्धः ब्र
ह्मापि जगत्कारणमिति कथमसंभावना स्यादित्यद्वितीयसंभावनाबुद्धिमात्रप्रयोजनत्वात् तस्याः नचाज्ञानमपि जगत्कारण
श्रुत्याविवक्षितं तस्य भ्रमनिमित्तमात्रत्वेनैवोक्तत्वात् कार्यकारणवादस्य वेदान्तैर्बहिर्भूतत्वात् विवर्तवादस्यैव वेदान्तवादत्वात्
किं जगतः कारणमिति पृष्टे प्रश्नः प्रतिभानिवृत्तिमात्रप्रयोजनतया अज्ञानं कारणमित्यभिहितत्वाच्च ॥०॥

त्वे

पा०२

कार्यत्वानिरूपणात् व्यापारवतः कारणं व्यापारस्याकार्यत्वे [illegible]सदाकार्यप्रसक्तेः कार्यत्वेनवस्थाप्रसक्तेः कार्यकारणभावस्य
कल्पितत्वेन प्रमाणायोग्यत्वात् तत्त्ववाद्वैतापत्तेः वेदान्तवादबहिर्भूतः कार्यकारणवाद इत्यर्थः यद्वा कार्यकारणवाद आरंभवादस्यपरि
णामवादस्य वा प्रसक्तेः तस्य चानिष्टत्वात् वेदान्तवादबहिर्भूतः स एवेत्यर्थः कस्तर्हि वेदान्तवाद इति तत्राह विवर्तवादेति॰ एकस्य तत्त्वा
दप्रच्युतस्य पूर्वविपरीतासत्यानेकरूपावभासो विवर्तः नन्वेतस्यां कल्पनायां मायां तु प्रकृतिं विद्यादित्यादिवाक्यप्रकृतिशब्दो विरुध्य
ते इत्याशंक्योपादानत्वबोधकवाक्यस्य गतिं प्रत्यनरमाह किं जगत इति॰ ॥ रामायनमः ॥

नन्वज्ञानं यदि निरूपणायथमवतरेत् भवतु तदुपादानं वा निमित्तमात्रं वा तदेव नास्ति कस्मात् प्रमाणाभावादिति शंकते नन्विदमिति· अनवस्थादीति· अनवस्था च तस्या आदौ च अनवस्थादयस्तेषां प्रसंगादित्यर्थः अनवस्थाम् आदिभूतान्योन्याश्रयचक्रकाख्यो दोषो अज्ञानान्तरजन्येषाम् अन्योन्याश्रयः तृतीयाज्ञानस्वीकारे चक्रकं चतुर्थे नवस्थेत्यर्थः यद्यप्यनन्ताज्ञानस्वीकारस्तदास्यात् यद्यनन्ताज्ञानपरंपरा वा गादिनी काचित् संवित्स्यान्न च सास्तीति प्रमाणाभावस्त्वादिपदेन गृह्यते ब्रह्माविद्याकारणमिति पक्षं दूषयति नद्वितीय इति· किमस्योपहितं ब्रह्माविद्याकारणमुत शुद्धं नाद्यः उपधानस्याविद्यातत्कार्यान्यतरस्याविद्यातः प्रागसत्वात् द्वितीयं दूषयति ब्रह्मण इति· कूटस्थत्वादित्यर्थः कारणमंगीकृत्यापि दूषयति अनिर्मोक्षेति· शुद्धब्रह्मणोऽज्ञानकारणत्वे तर्हि मुक्तस्यापि संसारः स्यात् संसारकारणाज्ञानस्य सामग्रीसत्वेन तदुत्पत्तेरवश्यक

नन्विदमज्ञानं कार्यमकार्यं वा आद्ये किमस्य कारणं अज्ञानं ब्रह्म वा नाद्यस्तेनैव तज्जनने आत्माश्रयात् अज्ञानान्तरानुसरणे त्वनवस्थादिप्रसंगाच्च न द्वितीयः ब्रह्मणोऽकारणत्वात् अनिर्मोक्षप्रसंगाच्च द्वितीये त्वनादिभावस्य निवृत्तिप्रसंगः ब्रह्मवत् न च कल्पितत्वाभ्यां विशेषः कल्पनासामग्र्यभावेन कल्पितत्वानुपपत्तेः न चानादिरयमध्यासः अध्यासत्वासिद्धेः विद्याबाध्यत्वा-

कल्पितत्वा

न्नासिद्धिरिति चेन्न अन्योन्याश्रयात् ॥७०॥

त्वादि 'मर्थः अनादीति· विमतमज्ञानं न निवर्तेत अनादित्वे सति भावत्वात् ब्रह्मवदित्यर्थः घटादावनैकान्तिकत्वपरिहारायानादिरिति विशेषणं प्रागभावव्यभिचारपरिहाराय विशेष्यं अत्र मिथ्यात्वमुपाधिमाशंक्य निराचष्टे नचेति· साधनव्यापकत्वादिति हेतुमाह कल्पनेति· सादृश्यपूर्वसंस्कारो दोषश्चेत्येतत्त्रयं कल्पनासामग्री तदज्ञानकल्पने नास्ति अज्ञानं यदि कल्पितं तर्हि आत्मन्येव तत्कल्पितमिति आत्माधिष्ठानं न चात्मा ज्ञानयोः सादृश्यमस्ति निरवयवत्वात् न चापूर्वसंस्कारो दोषो वास्ति नयोरज्ञानपूर्वकत्वेनाज्ञानात् प्रागसिद्धेरित्यर्थः ननु सादेरध्यासस्याभूत्वाभावित्वेकार्यत्वाद्भवतु तत्र सामग्र्यपेक्षा अध्यस्यमानमज्ञानमनादीति किं तत्र सामग्रीकल्पनीयेत्याशंक्याह नचेति· बाधे को त्र यमध्यासत्वं न चाज्ञाने बाधकमस्ति इति नाज्ञानमध्यस्तमित्यर्थः अज्ञाने बाधमाशंकते विद्येति· किं विद्यानिवर्त्यत्वं बाध्यत्वमुत कल्पितं सत विद्यानिवर्त्यत्वं वा आद्ये पूर्ववृत्तज्ञानस्योत्तरज्ञाननिवर्त्यस्य बाध्यतास्यादित्यभिप्रेत्याह नेति· द्वितीयं दूषयति अन्योन्येति· ॥७०॥

पत्रापा

कल्पितत्वे सिद्धे ज्ञानबाध्यत्वं ज्ञानबाध्यत्वे च कल्पितत्वमित्यन्योन्याश्रय इत्यर्थः नन्वपूर्वोक्तदोषाः किमज्ञानस्य स्वरूपमपलपन्ति उत वस्तुत्वं नाद्यः अहमज्ञ इति प्रतीतिसिद्धे ज्ञानस्वरूपे अयोगात् न द्वितीयः इष्टापत्तेरिति सिद्धान्तिमतमनूद्य दूषयति नचेत्यादिना अज्ञानस्य कल्पितत्वे सिद्धे दोषेऽपि न दोषः संपाद्यत इति स्यादेवेष्टापत्तिः न च कल्पितत्वं सिद्धमिति कथमिष्टापत्तिरिति न च वाच्यमित्यत्र हेतुमाह कल्पितत्वस्यैवेति नन्वेते एव दोषास्तस्याविद्यायाः कल्पितत्वं साधयिष्यन्तीति तत्राह धर्मिण एवेति सिद्धे धर्मिणि दोषैस्तत्र कल्पितत्वं साधनीयं न चाद्यापि धर्म्यज्ञानं सिद्धं अहमज्ञ इति प्रतीतेर्ज्ञानाभावविषयत्वादित्यर्थः असिद्धिः शाब्दार्थस्य प्रतियोगी सिद्धिज्ञानार्थो नञ् ज्ञानत्वेन सिद्धिपदार्थं विचारयितुं सिद्धान्ती प्रवर्तते नन्विति केयमिति सादिसिद्धत्वेनेति अयमर्थः अहमज्ञ इति तावत् प्रतीतिरुभयवादिसि

नचैते दोषा वस्तुनो वस्तुत्वापहारकाः कल्पितस्य चाज्ञानस्य किमेते कुर्युः स्वत एव तस्य वस्तुत्वाभावात् अत एवोक्तमलंकारो ह्ययमस्माकं यद्युक्तिप्रमाणाभ्यां दुर्घटत्वं सुघटत्वे कल्पितत्वं दुर्घटं भवेत इति वाच्यं कल्पितत्वस्य वाद्याद्यसिद्धत्वात् धर्मिण एवासिद्धेः नन्वियं सिद्धिरुत्पत्तिर्निर्वाणाद्यः अनादेस्तदभावस्येष्टत्वात् न द्वितीयः सादिसिद्धत्वेन तदभावात् ॥१०॥ ॐ

द्धा सा च न तावत् स्वप्रकाशमहिम्ना अज्ञानस्य जडत्वात् नापि प्रमाणात् लिंगाद्यप्रतिसंधानजन्यत्वेनानुमानादेरभावात् प्रत्यक्षादिति चेत् न किं बहिरिन्द्रियं उत मनः बहिरिन्द्रियाणामन्तरंगे प्रवृत्तेः नाद्यः मनश्चेत् न न ज्ञानमात्रं स्फुरति किंत्वहमवच्छिन्नं न जानामिति विशेषणं एषः शुद्धात्मा अहंकारविशिष्टो वाहंकारोपाधिको वा नाद्यः शुद्धस्य स्वप्रकाशत्वात् द्वितीये अहंकारात्मकस्य मनसोऽपि मनो वेद्यत्वमित्यतीन्द्रियत्वहानिः आत्माश्रयश्च तृतीये अहंकाराकारताप्रतीतिर्न स्यात् उपाधेस्तटस्थतया विषयकोटावप्रवेशात् यथापि न साकारवादत्वे साकारवादप्रसंगात् तृतीयो मनसो सर्वेऽपि ज्ञानप्रतिभासात्मनः सत्त्वप्रतीतिकरणतानुपपत्तेश्च तस्मात्प्रागेव ज्ञानात् साक्षिवेद्यमेवाज्ञानमिति धर्मिणो ज्ञानस्य सिद्धिरेवेति तदसिद्धेति ॥ राम

सिद्धि २७

सि॰ साक्षित्वेऽघटनमज्ञानस्य निरस्यति मैवमिति॰ साक्षी किं स्वसंबद्धं प्रकाशयति उताऽसंबद्धं आद्यं अपसिद्धांतप्रसंगेन दूषयति अज्ञानस्येति॰ तथा
वा संसर्गेन दृश्यते इति श्रुति विरोधप्रसंग इति द्वितीयं दूषयति संबंधं विनेति॰ प्रदीपादेः संबद्धस्यैव प्रकाशकत्वदर्शनादिति दृष्टांतसमुच्चयार्थः
मु॰ अकारः ननु संबंध एव वाऽज्ञानेन साक्षिणो मृग्यते किं वा वास्तवः नात्यः असमर्थविशेषणत्वात् न द्विकल्पितः सर्पः प्रदीपेन भास्यते न वाते
७१ न संबंधः प्रदीपस्य पारमार्थिकः अथ संबंधमात्रं तत्र मृग्यते द्विकल्पितः सोऽस्त्येवेति सिद्धांतिशंकामनूद्य दूषयति नचेति संबंधकल्पने
किं सादिरनादिर्वा सादिश्चेत् द्विकल्पकं किं संबंधतत् संबंधिभ्यामन्यत् उत तदेव नाद्यः संयोगे संबंधिनोऽन्यत्र संबंधोपादानत्वादर्श
नात् द्वितीयमनूद्य दूषयति संबंधेति॰ संबंध एव किं स्वात्मानं कल्पयति किं वा संबंधिना विति द्वितीयं पक्षं द्विधा विकल्प्य क्रमेण दूष
णमाह आत्माश्रयेति॰ संबंध एव चेत् स्वात्मानं कल्पयति तदात्माश्रयः संबंधिमध्ये पि किमज्ञानं कल्पयति साक्षी वा नाद्यः इत्याह अन्या

मैवं अज्ञानस्य साक्षिसिद्धत्वे साक्षिणोऽसंगत्वभंगप्रसंगात् संबंधं विना चाप्रकाशकत्वात् न च पारमार्थिकसंबंधाभावेपि।
कल्पितसंबंधोऽस्त्येवेति वाच्यं संबंधसंबंधिनामन्यतमस्य कल्पकत्वे आत्माश्रयअन्योन्याश्रयकूटस्थत्वहानिअसंगत्वहानिअनि
र्मोक्षप्रसंगानां यथायथं प्रसंगः ॥०॥
न्याश्रयेति॰ अज्ञानं लब्धसत्ताकं स्वसंबंधं जनयिष्यति जनिते च संबंधे लब्धसत्ताकं भविष्यती
त्यन्योन्याश्रय इत्यर्थः साक्षिपक्षं प्रतिषेधयति कूटस्थत्वेति उपपन्नपयनुधर्मी विक्रोति द्विधर्मिणमिति न्यायात् कूटस्थत्वहानिरित्यर्थः
ह अथैतद्दोषपरिहाराय पापपुरत एव वाऽज्ञानं संबंधं करोति साक्षी तत्रा असंगत्वेति॰ अज्ञाने हि साक्षिणः संबद्धे न स्वरूपं लभेत अल
ब्धसत्ताकं च नोपाधिं जनयति तथा च येनोपहितः साक्षी स उपाधिः पारमार्थिक इति तत्संसर्गित्वेऽसंगत्वहानिरित्यर्थः अत्रैव दूषणांत
रमाह अनिर्मोक्षेति॰ तत्त्वसाक्षात्कारादज्ञाने नष्ट भवे च न श्रुति विरोधात्तन्यत् तथा च येनोपहितः साक्षी स उपाधिः परमार्थः त
स्योपाधेरुक्तविधया पारमार्थिकत्वादनिवृत्तेः तेनावस्थायामपि तादृगज्ञानसंबंधहेतोः सद्भावादनुच्छिन्नः संसारः स्यादित्यर्थः ७१
अथैतद्दोषपरिहाराय अज्ञानसंबंधाध्यासोऽनादिरिति तन्नानादिभावत्वादात्मवन्निवृत्तिर्न स्यात् ॥०॥ राम

ग्रहणे नसंबंधाध्यासो ननिवर्तते ऽनादिभावत्वात् आत्मवदित्य नुमाने ऽविद्यातंत्रत्वानधिकरणत्वमुपाधिं शंकते नन्विति तस्य साधनाव्यापकत्वमाह नेति
साधनाव्यापकत्वं पक्षे ऽध्यासे न प्याच तस्या विद्यातंत्रत्वे ननिवृत्तिः स्यादिति शंकितु राशयः साधनव्यापकत्वेनोपाधेः समाधत्ते नचवाच्यमिति प्रतिज्ञायां हेतु
नवं ३
माहृत स्येति तथाच पक्षे ऽविद्यातंत्रत्वानधिकरणत्वमस्तीति साधनव्यापकत्वा

नन्वनिवृत्तावनादिभावत्वं नप्रयोजकं किंत्वविद्यातंत्रत्वानधिकरणत्वं संबंधस्यानिवर्तने ऽविद्यातंत्रत्वादिति शंकित्वा परिहरति नचाविद्येति· उपाधेः नोपाधिरिति
साधनव्यापकत्वे पूर्वोक्तं हेतुमाह नस्येति· किमिदमज्ञानतंत्रत्वं किमज्ञानजन्यत्वं उताज्ञानभास्यत्वं अथाज्ञानाधीनस्थितिकत्वं नप्रथमद्वितीयावि। साध्यानुसारापः
त्याह अनादेरित्यादिना संबंधिज्ञानाधीनमिति· तथाच विशेषणीभूतसंबंधिनोपितत् ज्ञानहेतुत्वात् संबंधस्याज्ञानतंत्रत्वमित्यर्थः तृतीयं दूष।
यति नवेति· संबंधः किमलब्धसत्ताक एवस्थितिमात्रार्थं संबंधिनमपेक्षते उत लब्धसत्ताकः आद्यं दूषयति· लब्धेति· द्वितीयेपिसत्तालाभः
किंहेतोरुत हेतुनैरपेक्ष्येण आद्ये अनादित्वपक्षहानिः द्वितीयं दूषयति हेत्वनपेक्षत्वइति· आत्मनितथा दर्शनादित्यर्थः नन्वज्ञानेनाज्ञानस्य

नचाविद्याध्यासवत्तत्संबंधाध्यासस्याप्यनादित्वेनाविद्यादिहेतुजन्यत्वेपि नतंत्रतयातन्निवृत्तौ निवृत्तिः स्यादिति वाच्यं तस्यानादेरुत्प।
त्तौ निरपेक्षस्य सादर्यांधीनज्ञानस्याज्ञानानपेक्षतया तत्तंत्रत्वानुपपत्तेः नचसंबंधिज्ञानाधीनं संबंधज्ञानं लोके दृष्टमिति वाच्यं तस्य।
प्रत्यक्षादिसिद्धस्य तत्सापेक्षत्वे पीह संबंधिनोप्यज्ञानस्य सादिसंबंधसापेक्षस्फूर्तिकत्वेन वैपरीत्यात् नचसंबंधः स्वस्थित्यर्थं सं
बंधिनमपेक्षते इति वाच्यम् लब्धसत्तास्फूर्तिकस्यैव स्थित्यपेक्षणात् हेत्वनपेक्षत्वे इतरानपेक्षस्थितिकत्वाच्च नचाज्ञानस्य ग्रहप्रागभा
वरूपस्य ग्रहानुपलंभादुपलंभ इति वाच्यं नित्योपलंभरूपस्यात्मनो ऽनुपलंभानुपपत्तेः भावरूपजगदुपादानस्य चाज्ञानस्याभाव
रूपत्वानुपपत्तेः तथाचाज्ञानस्यैवाभावात् कथं तज्जरात्कारणत्वेनैवोपन्यस्यतेइति मैवं प्रसक्तस्याज्ञानपूर्वत्वादाक्षेपप्रतियोगि
धीः अवश्यंभाविनी पूर्वीविरोधः स्यादितोन्यथा ३५

गभावः सचज्ञानानुपलब्ध्याग्रहीत इति कथं तदसिद्धिरित्याशंक्याह दूषयति नवेति· ग्रहशब्देन किंवृत्तिर्विवक्षिता किंवा स्वरूपचैतन्यं नाद्यः
वृत्तेर्जडत्वेन मुख्यग्रहत्वानुपपत्तेः द्वितीयं दूषयति नित्योपलंभेति· नित्योपलंभात्मनो ऽनुपलब्धिरयुक्तेत्यर्थः अज्ञाननिराकरणमुपसंहर
इति तथाचेति तन्निराकरणस्यप्रकृतोपयोगमाह कथंतदिति· पतत्पूर्वपक्षनिषेधं प्रतिजानीते मैवमिति विरोधइति· इतः स्वरूपप्र।
हरा सिद्धात्पाभ्या मन्यथा स्वरूपविषयप्रमाणप्रसक्तविरोधः स्यात् अज्ञानस्य प्रमाणनिरसनीयत्वात्तत्प्रमाणप्रसक्तोविरुद्धः स्यादित्यर्थः

स्तोक्तं व्याख्यातुं भूमिकामाह कथमिति· अज्ञानांगीकर्त्तॄन्प्रतिपदिदं पूर्वपक्षी वदति अज्ञानसिद्धिः कथमिति सत्यं वदन् सिद्धांतिनाप्र।
सि हृव्यः इत्यर्थः प्रष्टव्यमाह किमयमित्यादिना स्वरूपबोधकमित्यर्थः आद्यमज्ञानस्वरूपविषयकपक्षमनूद्य दूषयति आद्य इति· अयमर्थः प्र
मु· सोऽद्विविधव्यवहारविशेषः व्यवहारश्च व्यवहर्त्तव्यज्ञानसाध्यः व्यवहर्त्तव्यं चाज्ञाज्ञानरूपमिति· तत्र ज्ञानमावश्यकं तथा चाज्ञानस्वरूपस्य स
७२ त्वांप्रतिसिद्धत्वात् अतो ऽज्ञानस्वरूपसिद्धये द्वेधा प्रश्न इति ननु नाज्ञानरूपसामान्यजिज्ञासया प्रश्नोऽयं येनायमुपालंभः स्यात् किं तु तत्
विशेषजिज्ञासयेति तत्राह नचेति· ऊतइतितत्राह उक्तेति· वैयर्थ्यादित्यर्थः अज्ञानस्वरूपसिद्धिरेव मत्पक्षे साचेत् सामान्यतएव सिद्धा किं
विशेषज्ञानेनेत्यर्थः यद्वा सामान्यप्रतीतिरेव विना विशेषमपर्यवस्यंती विशेषमर्पितेकथितवती तिष्ठ्यात्तज्जिज्ञासया प्रसरइत्यर्थः हि

कथमज्ञानसिद्धिरितिवदन्प्रष्टव्यः किमयमज्ञानस्वरूपविषयकः प्रश्नः किं वा तत्स्वरूपाक्षेपः किं वा तत्स्वरूपसाधकप्रमाण
प्रश्न एवायं आद्ये अज्ञाते स्वरूपे प्रश्नानुपपत्तेः प्रश्नात्पूर्वमज्ञानस्वरूपसिद्धेः अवश्यंभावात् तवैवाज्ञानस्वरूपं सिद्धमिति कोऽत्रा
प प्रश्नः नच सामान्यतो ज्ञानाद्विशेषजिज्ञासायुक्ता उक्तदोषान्नद्वितीयोऽक्षेपो युक्तः अभावज्ञानस्य प्रतियोगिज्ञानपूर्वकत्वनियमेनाज्ञान
स्वरूपसिद्धेः पूर्वमेव वृत्तित्वात् नच भ्रमोपस्थितस्याज्ञानस्याक्षेपो न्याय्यः यतः केनकुत्र भ्रम इति पृष्ठे परोक्तशास्त्राभासेनाज्ञानवि
षयकः इत्येवोत्तरम् ॥०॥

तीयमाक्षेपपक्षं दूषयति नचेति· अज्ञानादेः पोनामाज्ञानतिरस्करणं तदभावावबोधनमिति यावत्तदभा ७२
वस्य शाब्देन बोधनीयः शाब्दस्य ज्ञानपुरःसरः अभावज्ञानं च प्रतियोगिज्ञानाधीनं ज्ञानमिति· प्रतियोग्यज्ञानं सिद्धमिति न तदपलापमर्हतीत्य
र्थः ननु प्रमाणसिद्धमेव नापलापयोग्यं अज्ञानं पुनर्भ्रमोपस्थितमिति कथं तन्नापयोग्यमिति तत्राह नचेति· भ्रमस्य कारणं विषयार्थी लोप
न तावत्तदुभयं त्वं वा च्यमिति सिद्धांत्याह यत इति· शास्त्राभास एव भ्रमकारणं अज्ञानं च तस्य विषय इति पूर्वपक्षिणे सिद्धांती मनं ददाति
या परोक्तेति· शास्त्रस्याभासत्वोपपादनाय परोक्तेति विशेषणं ॥०॥

द्वितीये ऽन्योन्याश्रयः तृतीये चक्रकं चतुर्थे निवस्थास्या दित्याह २ पाठांतर

र्थाद्ये

ख३

सिद्धांतेवशर्ववपतिलोमतमित्यंदत्वानतद्दूषयति तथाचेति॰ अज्ञानभ्रमेउपादानंकिंअज्ञानंउतान्यत नाद्यः अज्ञानस्योपादानत्वात् तदज्ञानंकिं
निरूपणीयत्वेनप्रकृतंतदेवउतान्यत आद्येआत्माश्रयः द्वितीयप्रश्नेत्वाह भ्रमस्येति॰ अस्यानेकाज्ञानपरंपरेतिचेत्तत्राह इतेति अज्ञानांगीकारे
स्वमतस्याघातः एकेनैवाज्ञानेनसर्वाकारस्यान्याकारस्यचभ्रमसिद्धेरनेकाज्ञानस्वीकारेगौरवं किंचाज्ञानस्यजडत्वेनस्वतएवावृत्तेर्नैकस्वरूपत्वा
न्नावरणकृत्याभावादज्ञानविषयकाज्ञानस्वीकारेवैयर्थ्यं एवमपिअज्ञानानिस्वीक्रियेरन् यद्यज्ञानपरंपरावगाहिनीकाचित्संविदुदिता
स्यान्नचैवमस्तीतिदूषणाद्योतनायादिपदंद्वयोरुभयोः समोदोषः इतिन्यायमाश्रित्यपरसूर्ववपतिमतंतत्दूषयति नचैवमिति॰ परिहारासा
म्येहेतुमाह अज्ञानतयेति॰ परिहारसाम्यव्याजेनतृतीयंपक्षमुत्थापयति अस्तुतर्हीति॰ अज्ञानस्यसादित्वसिद्धंतंनिराकर्तुमाह प

तथाचभ्रमस्यस्वसमानविषयकाज्ञानोपपादकत्वादज्ञानविषयकापराज्ञानस्वीकारे नवस्थादुर्वारांतंतर्हिएकाज्ञानासदिद्युत
यादेवंप्रथमज्ञानस्यानेकाज्ञानस्वीकारेणमदोन्मत्तस्यस्वव्याघातगौरववैयर्थ्यादिदोषमपश्यतः स्वपक्षनिर्वाहोव्याहतएवेन
चैवंक्वचिदपिप्रत्मातेपयोः सत्वात्तुल्यः पर्यनुयोगइतिवाच्यम् अज्ञानतयासादित्वसिद्धाज्ञाननिहत्यर्थंप्रमाणप्रसंगस्यप्रमाण
दर्शनेनस्वरूपतिरस्कारस्यपरस्यचात्मस्तकर्तृत्वस्यकरत्वात् अस्तुतर्हिममापिसादित्वसिद्धेःज्ञानेप्रमाणप्रसंगःसमंजसः एवंतर्हिअज्ञानसा
दित्वेनः संबंधोपिवाच्यः अन्यथासादित्वेनःसाधकत्वानुपपत्तेः तथाचाज्ञाननत्संबंधयोरनादित्वमपिअन्यथापूर्वमुक्तस्येदानींसंसारो
पलंभःस्यात नचपूर्वमप्यज्ञानांतरमेवेतिवाच्यं अज्ञानपरंपरातएकस्यैवलघुत्वात ॥१०॥

वमिति॰ अज्ञानसादिसंबंधस्यानादित्वविपक्षबाधकेनदृढयति अन्यथेति॰ सादयज्ञानसंबंधस्यसादित्वेआदिकारणंकिंआत्मा अज्ञानंवाआद्ये।
मुक्तस्यापिसंसारोपलंभःस्यादित्यर्थः अज्ञानंचेत् तत्किंसंबंधिरूपमन्यद्वानान्यः स्वतेज्ञानानासंप्रतिपत्तेः संबद्धंचेत्संबंधस्यायाप्यसिद्धत्वात.
अज्ञानांतरपक्षमनूद्यदूषयति नचेति॰ तदप्यज्ञानंसंबद्धमसंबद्धंवाअंत्येस्वतेजाज्ञानप्रसक्तिः द्वितीयेः नवस्थानत्वियमनवस्थानदोषायअज्ञानपरं
परायाअनादित्वादितिचेत्तत्राह अज्ञानपरंपरातइति॰ अयमर्थः आत्मनिकिमिति अज्ञानपरंपरास्वीक्रियतेआवरणार्थमितिचेत् एकेनैवतद्
पपत्तेः अज्ञानसंबंधार्थमितिचेत् स्वेनैवस्वसंबंधोपपादनात्समवायवद्यथासमवायः स्वसंबंधप्रतीतिसिद्धस्वसंबंधंस्वयमेवोपपादयति नच

समवायांतरंसमवायत्त्वरयोः संबंधोपपादकंतथाज्ञानसादिसंबंधोपपादकमज्ञानमेवेति
लाघवादेकमेवाज्ञानंयुक्तंनतुपरंपरेति॰ ॥१०॥

सि॰ मु॰ ७३ अज्ञानस्यसत्वेहेतावयनेऽसत्वेः परोक्षप्रतीत्यविषयत्वापत्तेरनिर्वचनीयं तत् अभावत्वेप्रपंचोपादानत्वानस्यादित्यज्ञानंभावरूपं भावस्यैवोपादानत्वेनतत्कार्येस
त्वबुद्धिर्नस्यादिति॰ एकस्यानेकविचित्रकार्यजनकत्वानुपपत्तिरूपंरूपांतरमाह विचित्रेति॰ धर्मिभेदकल्पनातोधर्मभेदकल्पनावरमित्यभिप्रेत्याह
एकत्वमिति॰ अनादेरपितस्यनिवृत्त्यर्थंज्ञाननिवृत्तियोग्यत्वमपिवक्तव्यमित्यभिप्रेत्याह अन्त्येति॰ एवपूर्वप्रतिपादितप्रकारज्ञानेनतत्स्वरूपमुपपाद्याज्ञानसाध
कप्रमाणविषयकप्रश्नमुपपन्नंनिरस्यति तथाचेति॰ यद्येतादृशमज्ञानंसाक्षिणैवसिद्धंकिमत्रप्रमाणंकरिष्यति॰ सिद्धे साधनवैयर्थ्यादित्यर्थः ना
ज्ञानस्वरूपसिद्धयेप्रमाणंपृष्टं किंत्वज्ञानविषयाज्ञाननिवृत्तयेनचाज्ञानविषयाज्ञाननिवृत्तिः साक्षिणैवसिध्यति तस्यतत्साधकत्वादितिपरम
तं दूषयति॰ नचेति॰ तदभावादिति॰ अज्ञानविषयकाज्ञानाभावादित्यर्थः अज्ञानस्यजडत्वेनस्वस्यएवावृत्तेनैकरूपत्वादित्यर्थः ननुयथालोकदृष्टान्ते

तत्त्वयद्येनविनानुपपन्नंतत्सर्वंसंवंपि अनादित्वमनिर्वचनीयत्वंभावरूपत्वंविचित्रशक्तिकत्वमेकत्वमस्यद्वापत्तिंकिंविदपेक्षितंतस्योपपादकत्वे
नस्वीकल्प्यमितिवाच्यं तथात्वप्रमाणप्रश्नोऽनर्थकएवाज्ञानस्यसाक्षिणैवसिद्धत्वात् नचाज्ञानविषयाज्ञाननिवृत्त्यर्थंप्रमाणप्रश्नोऽप्र
कृतइतिवाच्यं तदभावात् अज्ञानस्यप्रमाणेनज्ञातुमशक्यत्वाच्चतेनतस्यविरोधात् तद्यथातमोदीपस्याथः तथाहि अज्ञानंज्ञातुमिच्छे
द्योमानेनात्यंतमूढधीः सतुनूनंतमःपश्येत् दीपेनोत्तमतेजसा तथाचाज्ञानंकथमितिप्रष्टेवात्माज्ञानमुपपादनीयमितिस्वानुभा
वसिद्धंकथंतानुपपत्तिरेव ॥१०॥

पिघटेप्रमाणस्यप्रवृत्तिवदज्ञानेपिप्रमाणंप्रवर्त्ततामितितत्राह अज्ञानस्येति॰ घटस्यप्रमाणानिवर्त्यत्वात् भवतुनामप्रमाणेनशक्यज्ञानत्वं अज्ञान
स्यप्रमाणेननिवर्त्यनिवर्त्तकलक्षणविरोधात्तत्रप्रमाणप्रश्नेपत्व अविद्यायायुक्तमित्याह तेनेति॰ उक्तविरोधंन्यायेनस्पष्टयति तदयमिति॰ ननु ७३
दीपतमसोरपिननिवर्त्यनिवर्त्तकत्वविरोधः मंदप्रदीपेवषमतियुगपदुभयोरुपलब्धेरितितत्राह उत्तमतेजसेति॰ अज्ञानस्यान्यथानुप
पत्तिसिद्धमज्ञानंनकथंतत्रामंदतीत्युपसंहरति तथाचेति॰ ननुतदेवस्वीकर्त्तव्यंयत्रस्वप्रयोजनविरोधि अज्ञानंचानर्थहेतुत्वात्मुक्तिलक्ष
णप्रयोजनविरोध्येवेतिकथंतत्स्वीकर्त्तव्यम् ॥११॥ रामायनमः

नन्वेवं तद्वाक्यजन्यज्ञानान्निवृत्तिः श्रुतवेदांतानामपि पूर्ववत्संसारानुवृत्तिदर्शनादिति शंकते कुतस्तर्हीति· अज्ञानस्वीकारेऽपि न मुक्त्यनुपपत्तिः
वाक्योत्पत्त्यात् ब्रह्मात्मैक्यसाक्षात्कारादज्ञानबाधायां मुक्त्युपपत्तेरिति· कुतो मुक्तिरिति निर्देशं तु प्रसंगमत्वोत्तरमाह नन्वेति बाधशब्दार्थं निरूपयि
तुं जिज्ञासामुत्थापयति ननु कोऽयमिति· तत्र नैयायिकाभिमतं बाधस्वरूपमाह नेत्येति· इदं रजतमिति· पूर्वप्रत्ययः पुरोवर्त्तिविषयको रज
तत्वप्रकारकः तस्य प्रत्ययमेदं त्वेन व्यधिकरणेदं त्वाधिकरणेन धिकरणः प्रकारो यस्य स तत्प्रकारकस्तस्य भावस्तत्त्वं तद्विषयको निश्चयोऽनि
णायरिदमित्यइति स एव बाधइत्यर्थः ततश्च पूर्वज्ञानस्य भ्रमत्वनिश्चयो बाध इति भावः नेदं तदपसिद्धांतेन दूषयति· नेत्यादिना· अन्यथाख्या
तिवादिमते हि पुरोवर्त्ति निःशुक्तिकाशकलेन रजतं किंतु सादृश्याद्युद्बुद्धसंस्कारोपनीतरजततात्मना पुरोवर्त्ति भातीति भवति पूर्वज्ञानं भ्रमः विषयस्य
तथासत्वात् ततश्च तत्वेन [illegible] निश्चयो बाध इति तेषामेव युज्यते नास्माकं अस्मन्मते पुरोवर्त्तिनि मिथ्यारजतस्योत्पन्नत्वेनेदं त्वेन प्रकारस्य व्य
कुतस्तर्हि मे मुक्तिः कर्तृत्वाद्यशेषानर्थव्रातप्रभवबीजस्यात्माज्ञानस्य स्वानुभवसिद्धत्वात् तत्त्वमसीत्यादिवाक्यजन्यापरोक्षब्रह्मात्मसा
क्षात्कारेणात्माज्ञानबाधादेवेति शृणु ननु कोऽयं बाधः तत्र पूर्वप्रत्ययस्य व्यधिकरणप्रकारकत्वनिश्चय इत्यन्ये तन्न अन्यथाख्यात्यनं
गीकारात् अज्ञानस्याबाधापत्तेश्च सविलासाज्ञाननिवृत्तिरिति मदीयाः केचित्तदप्यापातरमणीयं प्रत्येकसमुदायाभ्यामव्याप्तेः ॥०॥
धिकरणत्वाभावात् ततोऽपसिद्धांत इति भावः किंच पूर्वप्रत्यये व्यधिकरणप्रकारकत्वनिश्चयोऽपि समानविषययोर्ज्ञानं बाधते न वा नाद्यः
भिन्नविषयत्वात् अज्ञानं हि शुक्तिविषयं बाधश्च ज्ञानस्य व्यधिकरणप्रकारकत्वविषयः नच भिन्नविषययोर्ज्ञानाज्ञानयोः निवर्त्यनिवर्त्त
कभावोऽतिप्रसंगात् द्वितीयस्तु वैयर्थ्यादयुक्त इत्याह अज्ञानस्येति· तथाच ज्ञानं विफलं संसारमूलाज्ञानस्यानिवृत्तेरिति भावः विवर
णाकारमतं दूषयितुमुत्थापयति सविलासेति· प्रत्येकेति किं विलासनिवृत्तिर्बाधः उताज्ञाननिवृत्तिर्बाधः उतोभयनिवृत्तिः तत्र प्रथमद्वितीयो
अव्याप्तेः अत एव न तृतीयः नहि प्रत्येकनिवृत्तिरुभयनिवृत्तिः प्रतियोगिभेदेनाभावभेदादित्यर्थः ननु कार्याकारेण परिणताज्ञाननिवृत्तिः प
व बाधः नचैवमव्याप्तिः सर्वत्रैवानुगमादिति चेत् सत्यं ॥०॥

सि॰ मु॰ ७४

तथापि निवृत्तौ प्रतियोगिकार्यकारणपरिणतमज्ञानं किं विशेषणमुपलक्षणं वा नाद्यः तादृगज्ञानस्यापि बाध्यत्वापत्तेरुपलक्षणं चेन्न अभावेऽपि
बाधकधर्मस्योपलक्षणकृतस्याभावात् निवृत्तिमात्रं बाधः स्यादिति॰ तत्र विकल्प इति किं चेति पदार्थान्तरमिति॰ न सत् नासत् न च सदसदात्मकं न
चानिर्वचनीयं किंतु पंचमप्रकार इत्यर्थः तद्व्यवहारात् बाधाव्यवहारादित्यर्थः तथात्वापत्तेर्बाध्यत्वापत्तेरित्यर्थः ननु पूर्वज्ञाननिवृत्तिंप्रतिनोत्तर
ज्ञानत्वेन कारणता किंतु क्षणिकविशेषगुणत्वेन तथा च तत्र नातिव्याप्तिरित्याशंक्याह ज्ञानमात्रेति॰ पदार्थान्तरं निवर्त्तते न वा आद्यं दूषयति ततध्वं
सेति॰ द्वितीयं दूषयति तदनिवृत्ताविति॰ ननु कथमद्वैतक्षतिः सतो द्वितीयस्याभावात् इति चेत् न पदार्थान्तरस्यानिर्वचनीयवैलक्षण्यात् सत्त्वा
वैलक्षण्याच्च आत्मवत्सद्रूपत्वोपपत्तेः ततः पदार्थान्तरस्थितौ कथं नाद्वैतक्षतिरिति तस्येति॰ आत्मरूपस्येत्यर्थः ननु नात्मस्वरूपमात्रं निवृत्तिः
किंचैकेयं निवृत्तिः ध्वंसमात्रं वा ज्ञानसाध्यः स एव वा पदार्थान्तरमेव वा आत्मस्वरूपं वा नाद्यः मुद्गराघाताज्जन्यघटादिध्वंसे तद्व्यवहारात्
न द्वितीयः उत्तरज्ञानसाध्यपूर्वज्ञानध्वंसे तथात्वापत्तेः ज्ञानमात्रध्वंसेति व्याप्तेश्च न तृतीयः ततध्वंसाव्यापनात् तदनिवृत्तावद्वैतक्षतेः नात
न चतुर्थः तस्य नित्यसिद्धत्वेन ज्ञानवैयर्थ्यापत्तेः तस्माद्बाधस्यैव निर्वक्तुमशक्यत्वात् कथमज्ञानतत्कार्यबाधान्मोक्ष इति अत्र ब्रूमः
साक्षात्कृतेनत्वधिष्ठाने समनन्तरनिश्चितिः अध्यस्यमानं नास्तीति बाध इत्युच्यते बुधैः ॥४॥ स्फुटेऽधिष्ठाने विपरीतमध्यस्य प्रवर्त्तमानस्या
निवर्त्तमानस्य वा यदधिष्ठानविषयकं बाधकज्ञानं परोक्षमपरोक्षं वोत्पन्नं तदनन्तरमिदमिह कालत्रयेऽपि नास्तीति यो यो निश्चयः स एव
बाध इति सर्वजनानुभवसिद्धं न चान्यथाख्यातिवादे व्यस्यार्थात् पर्यवसानमस्तीति वाच्यं तत्राध्यस्यमानस्यान्यत्र सत्त्वाभ्युपगमात्
किंतु तदुपलक्षितमिति चेत् न गृहे काकजन्योत्पत्त्यादिवदत्र वृत्तिजन्यात्मपरिच्छायकस्यात्मनिष्ठस्य धर्मस्याभावात् वृत्तेरुपलक्षणत्वानुपप
त्तेः प्रकृतोपयोगमुपपादयन् बाधनिराकरणमुपसंहरति तस्मादिति प्रतिपन्नोपाधावध्यस्यमाने कालत्रयेऽपि नास्तीति योऽधिष्ठाननिश्चयोऽनन्तरं
बाधः स एव बाध इति परिहरति अत्र ब्रूम इत्यादिना उक्तमर्थं संवादयति उच्यते बुधैरिति॰ श्लोकं व्याचष्टे स्फुटेऽधिष्ठान इति॰ परोक्षमपरोक्षमधि
ष्ठानज्ञानमपरोक्षे तदपरोक्षमिति विभागमाश्रित्याह परोक्षमपरोक्षं वेति ननु बाधविषयो बाध्यमनिर्वचनीयमिति भवतो मते तदिदं बाधविषयत्वं
निरुक्तमन्यथाख्यातिवादिमते सत्यपि कान्ताकरादौ विद्यमानस्य तेन गतंयतः तदपि कालत्रयेऽपुरोवर्त्तिनि शुक्तिकाशकले नास्तीति भवति निश्चय ७४

अन्यथाख्यातौ भ्रमविषयो रजतादिरन्यत्र सन् अस्मिन्मते तु यत्रैवाधिष्ठाने अध्यस्तो रजतादिस्तत्रैव तदा सन्नानात्सन् न स्यात्तत्त्रयोणीति भवति अधिष्ठानान्यार्थके
न त्रिकालं तत्सदेवेति विशेष इति उक्तमर्थं दृष्टांतिके योजयति एवमिति अध्यस्तस्य त्रैकालिकाभावनिश्चयस्य बाधत्वे संप्रदायविदामनिर्वचनीयत्व
लक्षणमुपपन्नं भवतीत्याह अत एवेति अनिर्वचनीयलक्षणासंभवमाशंक्य परिहरति नचेति अध्यस्तस्य मानस्य बाधोत्तरकाले असत्त्ववत् ततः पूर्व
मपि असत्त्वमेवेति नासंभवि लक्षणमित्यभिप्रेत्याह अनिर्वचनीयेति इममेवार्थं स्पष्टयति नहीति कदाचित्सत्त्वमात्रेणानिर्वचनीयत्वमतिव्याप्तेरित्यर्थः
यद्यपि अस्मन्मते घटादिरप्यनिर्वचनीय एव तथापि परस्य तत्र विप्रतिपत्तेरतिव्याप्तिः स्यादेवेति द्योतयितुं पराभिमतेत्यादि विशेषणं घटादिव्यावृत्तये विशेषणं
शंकित्वा दूषयति नचेति आविद्यकत्वे सति कादाचित्कमनिर्वचनीयमिति लक्षणं न युक्तमित्यर्थः शुक्तिरजतस्याविद्यकत्वं किं कारणमात्रप्रभवत्वं उत ज्ञान

एवं ब्रह्मात्मसाक्षात्कारे जाते अज्ञानं तत्कार्यं च सर्वं यावत् किंचित्तत्राप्यसत्तत्सर्वं तत्र कालत्रयेपि नास्तीति यो निश्चयः स्वानुभवसिद्धः स एव तस्य त
त्रैबाध इत्युच्यते अत एव प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं अनिर्वचनीयत्वमिति संप्रदायविदां लक्षणमपि समंजसं नचोत्तरकालीननिषेध
प्रतियोगित्वेपि वर्तमानातीतकालयोः सत्त्वात् त्रैकालिकनिषेधप्रतियोगित्वमनिर्वचनीयत्वमिति वाच्यं अनिर्वचनीयापरिज्ञानात् न
हि कादाचित्कत्वमात्रेणानिर्वचनीयत्वं भवति पराभिमतसत्यस्यापि घटादेस्तथात्वात् न चाविद्यकत्वेन विशेषः कारणस्य नामांतरक
णापत्तेः न च ज्ञानबाध्यत्वेन विशेषः तस्यापि मतेनानित्वप्रमित्यनुपपत्तेः ॥८॥०॥

बाध्यत्वं नाद्य इत्याह कारणस्येति अविद्याशब्देन कारणमुच्यते तथाच तज्जन्यं कादाचित्कमनिर्वचनीयमित्युक्तं भवति तथाच अतिव्याप्तिरित्यर्थः द्विती
यमनूद्य दूषयति नचेति तथाच घटादौ पूर्वपदेनातिव्याप्तिरिति भावः तस्यापीति तस्यापि विशेषस्यासंभवः कथं ज्ञानबाध्यत्वं नाम ज्ञाननिवर्त्य
त्वेन चेत्तत्र तः संभवति आत्मन्यतिप्रसंगात् अत एवाह सत इति ततो ज्ञानबाध्यत्वान्यथानुपपत्त्या वर्तमानातीतकालयोरप्यध्यस्तस्वरूपतोप्यसदे
वेत्यधिष्ठाने त्रैकालिकाभावप्रतियोगित्वमनिर्वचनीयत्वमित्यनवद्यं लक्षणमिति भावः ननु बाधात्मनिश्चयः किमात्मैव उत भिन्नः आद्ये संसारदशायां
द्वितीये बाध्यो बाध आत्मवत्सन् बाबाध्यश्चेत्तर्हि स्वस्य बाधः स्वयमेव बाधातं वा प्रथमे आत्माश्रयो द्वितीये अन्योन्याश्रयादिः संक्षेपतदाह नेति
रिति ॥०॥ राम राम ॥ ०॥

सि

मु॰

७५

परमतं दूषयति नचेति॰ हेतुमाह ब्रह्मेति॰ ब्रह्मण्यध्यस्यमानं सर्वं कालत्रयेनास्तीति निश्चयस्य ॥ स्तिरूपद्वयं पकं बाधात्मकं प्रपंचाध्यस्यमानत्वेन तत्र अध्य
स्यमानत्वेन रूपेण स्वविषयत्वं बाधत्वेन विषयित्वं इति तिनास्मा अयमर्थः तथा च नाद्वैतहानिरिति भावः ननु बाध्यमानः प्रपंचो ब्रह्मातिरिक्तोस्ति न वा अस्ति
चेत् आत्मवदनिवर्त्यः स्यात् नास्ति चेन्नद्वितदभावो द्वेषेण ज्ञानादौ प्रवृत्तिर्न स्यात् तदभावस्य स्वतः सिद्धत्वात् नच सदसद्विलक्षणं प्रकारांतर ।
मस्ति परस्परविरोधेन प्रकारांतरस्थितिरिति स्यापादिति तत्राह नचेति॰ अनिर्वचनीयत्वेनेति॰ नन्वावदिदं जगत् सत्त्वेनेति नेत्यादिश्रुत्या तावत्
बाधात् नाप्यसत् अपरोक्षत्वात् तस्मात् ख्यातिबाधान्यथानुपपत्त्या ब्रह्मातिरिक्तं सदसद्विलक्षणं अनिर्वचनीयं उक्तन्यायस्य च प्रमाणाविरोधेनाभा
सत्वात् एतत्व सतोपि जनिर्नैवेत्यादौ प्रसक्तत्वाच्चोद्यं परिहृतमित्यर्थः नन्वविविक्तव्यवहारप्रसंजकं स्मरणाद्गृहीतभेदं ग्रहणमेव भ्रमत्वेनाभ्युपगम्य द्वि
यत्वेन च तद्विषयोऽनिर्वचनीयः पूर्ववर्तिनः सत्वात् तथा नेदं रजतमिति बाधप्रत्ययोपि व्यवहारमात्रं बाधत्वेन भ्रमविषयस्य कालत्रयाभावं बोधय

नच सकलकार्यकारणबाधरूपस्य नास्तीति प्रत्ययस्य बाधांतरं स्मरणमन्यथा द्वैतहानिरिति बाच्यं ब्रह्मातिरिक्तसर्व
बाधरूपस्यतस्य स्वांतर्भावेनैव तथात्वात् नच ब्रह्मातिरिक्तमस्ति नास्ति वेति विकल्पावकाशः अनिर्वचनी
यत्वेन परिहृतत्वात् अख्यात्यात्मख्यातिसख्यातिवादेषु भ्रमबाधव्यवस्थानुपपत्तेरन्यथाख्यातिवादिनेः ।
वदर्शितत्वात् ॥ रामायनमः ॥०॥

अख्यातिवादिनोपि अन्यथाख्याति वादिनोपि ... ति तत्कथमनिर्वचनीयवाद इति अख्यातिवादिनो नैरजतमध्यस्तमित्याहुः किंतु संप्रयोगमंतरेणापरोक्षत्वात् संविदात्मकत्वेनांतरस्य रज
तस्य वदिहेवप्रतीतिर्भ्रमः नेदं रजतमिति बाधोपि न रजतासत्वमावेदयति किंतु नेदंतापरपर्यायं वदिहेत्वप्रतिषेधयति यथा मिथ्या भयनिषेधोपपत्
यापर्ममात्रनिषेधे लाघवादित्येवं सौगतैरेव प्रसक्तं ख्यातिवादिनोपि नानिर्वचनीयरजतमित्याहुः किंतु निस्तत्वमसदेव रजतं ज्ञानादेवासत्व ७५
काशात् समर्थात् रजतं भासते अत एव बाधोपि रजतासत्वमेव बाधयति नेदं रजतमिति ततो ब्रह्मव्यतिरिक्तं जगदनिर्वचनीयमित्येतदेवानि
र्वचनीयमित्याशंक्याह अख्यात्यात्मेति॰ अख्यातौ तावत् ग्रहणमेव स्मरणाद गृहीतभेदं बाध्याभेदव्यवहारप्रसंजकत्वात् भ्रमइति व्यवस्था
पयति तदसत् ग्रहणस्मरणे भासेते ॥ ० ॥ रामायनमः ॥ ॥ राम

अख्यातिवादिनो मीमांसकाः ... अयं मपि रजतं रजतं व्यवहारस्यैव बाधो भवतीत्याहुः २ आत्मख्यातिवादिनो बौद्धाः आंतरं र
जतं बहिर्भासते तत्र बहिष्ट्वस्यैव बाधइत्याहुः २ असत्ख्यातिवादिनो माध्यमिका अत्यंतासद्रजतमित्याहुः ३

नवानवेतर्हि नस्त्रः तन्मते ज्ञानस्य स्वप्रकाशत्वाद्भासने स्वरूपाभावनियमात् भासेते चेत्कथं तर्हि तयोर्भेदाग्रहः भेदस्य स्वरूपत्वात् अतएव नाभेदव्यव
हारश्रमजनकत्वं ततः कथं भ्रमव्यवस्थापनं तथा बाधव्यवस्थापनमप्यनुपपन्नं यत्र यत्कैषणास्य वा वस्तात्स्ववनो इति तत्रेनेदमिति ज्ञानस्य बाधकत्वं न स्यात्
तस्मादख्यातौ भ्रमादिव्यवस्थापनानुपपत्तिरिति आत्मख्यातावपि किं ज्ञानाकारत्वाद्बाह्ये अध्यस्यते ज्ञानात्मनि रजते वा वह्निस्तनाद्यः विज्ञानवादिमते
बाह्यस्यालीकत्वात् असत्वेनापि ज्ञानत्वानुपपत्तेः तथात्वे वा इदं रजतमसदिति प्रतीतिः स्यात् ननु सदिदं ज्ञानत्वाभावादसदेवेति चेत् न तथात्वे रज
तार्थिनः प्रवृत्तिर्न स्यात् अथ रजतेन वह्निस्तु समारोप्यते तर्हि तस्याप्यसत्वात्तद्विषयज्ञानस्यापरोक्षत्वानस्यात् असतख्यातौ पतत्स्वरजतस्य ज्ञानाकार
त्वे प्रमाणाभावाच्च नचवेनेदं रजतमिति बाधस्य पवलाघवानुगृहीतो रजतस्य बाह्यत्वनिषेधं नाथीखंतरत्वमावेदयतीति साप्रतं इदं त्वद्विस्त्रिवि
तत्वं तच्च त्रिविधं तर्हि संनिहितमेव रजतं स्यात्तस्य प्रतिपत्त्रात्मकसन्निहितत्वमतंकृतस्येन च संप्रयोगसमन्तरेणापरोक्षत्वात्तस्य ज्ञानात्मकत्वं दोषव
शात् देशांतरवर्त्तिनएव रजतस्येंद्रियसन्निकर्षानुपपत्तेः संप्रयोगसमंतरेणेति विशेषणासिद्धेः एतेनेदं रजतमिति बाधाबाह्यमिदं त्वं निषेधति नराज
ने इत्यस्ते ग्रंथगौरवभयादनात्मविचारत्वाच्च तस्माद्बाधकप्रत्ययोत्तरं अध्यस्तस्य त्रैकालिकासत्वनिश्चयो बाधइति सिद्धं तथाच सुरेश्व
रः तत्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः अविद्यासहकार्येण नासीदस्ति भविष्यति ॥०॥
तमिति तत्र बाधो नोभयमपि निषेधति किं तत्र योस्तादात्म्यं तस्मिं अनिषिद्धे इदं त्वं पुरोवर्त्तिनिष्ठात्यति रजतं रजतत्वं वा देशांतरे रजते वेति तन्म
ते भ्रमबाधव्यवस्थापनमनुचितमेव यत्तु असत्ख्यातावसदेवासत् प्रकाशनसमर्थं ज्ञानं भासयतीति तदप्यसत् असतो अपरोक्षप्रतीत्यदर्शना
त् सामर्थ्यस्य च कुत्र सामर्थ्यमिति विषयसापेक्षत्वेन विषयस्यासतश्च कार्यत्वाप्यविकल्पासहत्वादसतेवासत्ख्यातिः यदपि बाधो रजतास
त्वमेवावेदयतीति तदप्यन्यथाख्यातिवादिमते पूर्वमेवात्मख्यातिनिराकरणप्रसंगेएव परिहृतं ततो न ख्यात्यंतरे युक्तमित्यर्थः ननु अन्यथाख्याति
वादिना दर्शितं चेत् किं तवेति तत्राह नेहेति अन्यत एव ख्यात्यंतरनिराकरणस्य सिद्धत्वात् नेत्रिराकरणं पुनरयुक्तं साक्षादात्मविचाराभावादि
त्यर्थः सर्वदोषापेतं बाधनिरूपणमुपसंहरति तस्मादिति उक्तमर्थं सुरेश्वराचार्यवचनेन द्रढयति तथाचेति अत्रनासीदिति त्रैकालिका
सत्वमेव जगतो अधिष्ठानसाक्षात्कारानंतरं प्रतीयतइतिनन प्रतीतिरेव बाधो नाविद्यानिवृत्तिरित्यर्थः ॥०॥

अन्यथा ख्याते

नैयायिकाः सत्यमेव रजतं देशांतरे भासते इत्याहुः ४

सि॰ इममेवार्थं दृढयितुं शंकामुत्थापयति अथ कथमिति॰ विद्याविषयतानसाक्षात्कारः प्रसंगमतोऽन्तरं शंकते विरोधेति॰ नहि विरोधमेव निर्वचनेन ब्रूहीत्याह कस्त
मु॰ र्हीति॰ किं शब्दसूचितान् विकल्पानाह किमेकेत्यादिना ननु पूर्वभावित्वमेककालावस्थानेन प्रयोजकं घटप्रागभावस्य पूर्वभाविनोऽपि घटेन सहानवस्था
७६ नात् इति तत्राह विद्योत्तरमिति॰ घटस्य प्रागभावनिवृत्तिरूपत्वान्नैककालत्वेन योर्युक्तं अविद्यानिवृत्तेः विद्याजन्यत्वेन तदुत्तरकालीनत्वाद्विद्याविद्ययोरे
ककालत्वमनपहरणीयमेवेत्यर्थः ननु किमिति विद्याऽविद्यां निवर्त्तयिष्यति प्रमेयावभासकत्वेन तस्या अन्यथासिद्धेरिति तत्राह अन्यथेति॰ प्रमेयस्य
स्वप्रकाशत्वाद्विद्याः विद्यावेन्न निवर्त्तयेत व्यर्था स्यादित्यर्थः वक्तव्यत्वाद्विरोधसिद्ध्यर्थमित्यर्थः ज्ञानस्य वक्तव्यत्वे प्रकृतोपयोगमाह यत्कर्तृत्वमिति॰

अथ कथं विद्याया अविद्याबाधकत्वं विरोधादिति चेत् कस्तर्हि तयोर्विरोधः किमेककालानवस्थितत्वं उतैकदेशानवस्थितत्वं आहोस्विद् घात्यघातक
त्वं अथवा भावाभावात्मकत्वं नाद्यः पूर्वभाविन्याविद्यायाः सहविद्यायाः एककालावस्थितत्वात् विद्योत्तरमविद्याविनिवृत्तेः अन्यथा विद्यावै
यर्थ्यात् न द्वितीयः व्यधिकरणयोर्विद्याविद्ययोर्विरोधाभावेनैकाधिकरणत्वस्यावश्यं वक्तव्यत्वात् तृतीये वध्यस्य घातो वाच्यः यत्कर्तृत्वं घात
कत्वं ध्वंसो घातस्तत्कर्तृत्वं घातकत्वमिति चेत् स तर्हि वध्याद्भिन्नः स्वतंत्रः पदार्थः कश्चित् उत तद्धर्मः नाद्यो मैव वा आद्ये वध्यस्य ध्वंसो न स्यात्
हिमवद्विंध्ययोरिव परस्परमसंबंधात् द्वितीये धर्मपवधर्मिणोर्दीर्घापुष्टमानयति अन्यथा निराश्रयो धर्म एव न स्यात् तृतीये तु विद्याविद्योऽन्या
दिकैवेति कुतो विरोधः न चतुर्थः विद्याविद्ययोरुभयोरपि भावरूपत्वात् अविद्यायाः प्रागभावरूपत्वस्य निरस्तत्वात् अन्यथा पककालत्वे वि
स्यानेनस्यात् तस्माद्विद्याविद्ययोर्विरोधस्य निर्वक्तुमशक्यत्वात् कथं विद्याया अविद्याबाधकत्वम् ॥१०॥

घातस्वरूपं निरूपयति ध्वंसइति॰ स्वतंत्रइति॰ न तावत् ध्वंसो वध्यजन्यः भिन्नत्वात् न च भिन्नेऽपि घटे निमित्तं दंडादि जनकं यथा एवं भिन्नमपि ध्वंसं प्रति
योगितया वध्यं जनयेदिति वाच्यं कल्पितप्रतियोगिनो ध्वंसस्य कल्पितत्वेन मुक्तेरपि कल्पितत्वप्रसंगात् अकल्पितत्वे हेत्वापत्तेश्च नापि तस्याऽवि ७६
द्याज्ञानाधीनज्ञानत्वं अविद्यानिवृत्त्यवस्थायां प्रमातृबाधभावेन तद्विषयकजन्यज्ञानासिद्धेः ततः सर्वात्मनाऽविद्ययाऽसंबंधात् ध्वंसः स्वतंत्र एवेत्यर्थः
भिन्नोऽपि न स्वतंत्रस्तद्धर्मत्वादित्यभिप्रेत्य पक्षान्तरमाह उत तद्धर्मइति॰ पूर्वोक्तं स्वतंत्रशब्दार्थमाश्रित्याद्ये दूषयति आद्यइत्यादिना निरस्तत्वादिति।
भावरूपजगदुपादानस्यान्यत्रेतिशेषः ॥१०॥ रामाय नमः ॥१०॥

किंच विद्याविद्ययोर्विरोधाविशेषाद्धि द्वैधवाध्या किं न स्यान्नियमे प्रमाणाभावादित्याह विपरीतं वेति । पूर्वपक्षानुवादेन सिद्धांतमुपक्रमते अत्रोच्य
न इति । को विरोध इति प्रश्ने विरोधं निरूपयितुं विरोधकार्यमाह उपमर्द्येति । विपरीतं वेति दोषं परिहर्तुं प्रमाणमाह स्वभावेति । विद्यायां
कर्तृत्वं विरोधित्वेनेति पूर्वेणान्वयः स्वभावे दृष्टांतमाह प्रकाशतमसोरिवेति । श्लोकं व्याचष्टे यद्यपीत्यादिना पूर्वोक्तविरोधदोषाणामपरिहा
र्यत्वमाह विरोधांतरमिति । तथापीति । उपमर्द्योपमर्दकयोर्भावस्तेन लक्ष्यते ऽनुमीयते यो विरोधः स उपमर्द्योपमर्दकभावलक्षणः । का
र्येण कारणस्यानुमानादित्यर्थः । अविद्योपमर्द्यैवेत्यत्र स्वभावपदसूचितं हेतुं विवृणोति । अविद्योपमर्दकत्वेऽस्येति । सत्यां विद्यायां नाविद्या
पा॰ १ यथैवं शुक्तिरिति विद्यायां शुक्त्यविद्या उपमर्द्यैनैवात्र रजतमासीदिति । शुक्तिविद्याया अभावे सति शुक्त्यावरणमन्यथा रजतात्मना च प्रति
विपरीतं वा किं न स्यादिति अत्रोच्यते उपमर्द्यस्वभावत्वमविद्याया विरोधित्वात् कर्तृत्वं तु विद्यायाः प्रकाशतमसोरिव ॥ यद्यपि ।
विरोधांतरमिह निर्वक्तुमशक्यं तथाप्युपमर्द्योपमर्दकभावलक्षणो यं विरोधः शक्यते एव निर्वक्तुं अविद्योपमर्दकत्वस्य वि
द्यास्वभावस्यान्वयव्यतिरेकाभ्यां लोकप्रसिद्धत्वात् न च विरोधित्वाविशेषे विद्योपमर्दकत्वमेवाविद्यायाः किं न स्यादिति वाच्यं
तथा च सति विद्योत्पत्तिरेव न स्यात् उपमर्दिकाया अविद्यायाः पूर्वं व्यवस्थितत्वात् प्रतिनियतस्वभावस्य पर्यनुयोक्तुमशक्यत्वाच्च
यथा प्रकाशतमसोः न च तत्र वैपरीत्यं शंक्यते दृष्टविरोधात् न च वध्यघातकपक्षोक्तदोषप्रसक्तिः अपमर्दस्य कालत्रयेपि नास्ती।
भासो ऽदृश्यत इत्यन्वयव्यतिरेकाभ्यामविद्यैवोपमर्द्यस्वभावेति लोकप्रसिद्धा कल्प्यत इत्यर्थः । अन्वयव्यतिरेकसिद्धस्वभावमप्युपमर्द्योपमर्दकत्वं विपक्ष
वाधकेनापि द्रढयितुं पूर्वपक्षे वैपरीत्यप्रसक्तिरूपमनुपपत्तिमाचष्टे न चेत्यादिना विमता विद्योपमर्द्या अविद्यात्वात् शुक्त्यविद्यावदित्यनुमानं विपक्ष
वाधकसहितमर्थात्सूचितं संप्रति तन्त्रेव देवं तत्र माह प्रतिनियतेति । ननूपमर्द्यत्वविद्यातो ऽभिन्नत्वस्वतंत्रत्वादिदोषप्रसक्तिरत्रापि प्राप्तेत्याशंक्य
तो स्यापीत्याह नचेति । ब्रह्मणि कालत्रयेपि सविलासाविद्या नास्तीति निश्चयस्योपमर्दत्वात् न स्य च विषयावाधेन प्रमारूपत्वात् ननु अविद्या
चेन्न निवर्त्तते तर्हि ब्रह्मात्मैक्यसाक्षात्कारो विफलः स्यात् तत्राह ॥१०॥

सि॰ विद्योदयमिति॰ ब्रह्मसाक्षात्कारस्य वाधात्मकोपमर्दएव फलं अधिष्ठानभेदेनाविद्यादेरसत्वेन तन्निवृत्तेः कर्तुमशक्यत्वात् कस्तर्हि वाधस्य ज्ञा
मु॰ नात्मनो विषयः निर्विषयज्ञानायोगादिति चेन्न अविद्यादेस्त्रैकालिकनिषेधएव ननु सोपि किमभावो॰ सन् सन्वाप्राद्येतस्यैतद्योगिनो
७७ अज्ञानादेः सत्वापत्तिः संश्चेत्तर्हि आत्मनोभिन्नश्चेत् आत्मैव प्राप्यः द्वैतापत्तिः अस्य अधिष्ठानसाक्षात्कारएव सइति वाधविद्ययोर्नज
न्यजनकतेति मैवं साक्षात्कारोपाधिकात्मस्वरूपस्यैव त्रैकालिकाभावत्वात् शुद्धेनवोपाधिनासविलासाविद्याकालत्रयेपि आत्म
निनास्तीत्यात्मस्वरूपविषयज्ञानेजन्यन इति कोदोषः नचायंपक्षः केनापि संप्रदायविद्भिर्नस्वीकृत इति वाच्यं वार्त्तिककृतास्यमेतद्दर्शि
तत्वात् विवरणाचार्यैरपि ननु प्रतिपन्नोपाधौ रजतोदरभावं वाधो वोधयतीति प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वं नामेति
वदद्भिरयमपिपक्षोदर्शितएव कथमन्यथा निवाधो वोधयतीति वदेयुः कथं वा तत्वदीपनाचार्या अभावपदं त्रैकालिकाभावपरतयाव्याकु

विद्योदयं ज्ञापमानत्वात् नन्वविद्योपमर्दकस्वभावत्वं चेद्विद्याया स्तर्हि विरुद्धोविद्यास्यतनंतरं अविद्यायाः सकार्यायाः स
मूलकाषंकषितत्वात् तद्देवविदेहकैवल्यप्राप्तेर्देहपातस्तात्कालिकः स्यात् तथाचोक्तिश्चः संप्रदायः स्यात् ॥१०॥

ध्रुः तस्मात्तेरपि पक्षोयं स्वीकृतएवेति नासांप्रदायिकमेतदिति॰ नन्वविद्योपमर्दकत्वे विद्याया न युक्तं जीवन्मुक्त्यभावप्रसंगात् इति
शंकते नन्वित्यादिना समूलइति॰ नन्वविद्यायाअनादित्वात् मूलानुपपत्तिः नचाधिष्ठानमेव मूलं तस्य सत्यैकरूपस्य कल्पितत्वानु
पपत्तेः तत्ववाधूम्प्यात्मतापत्तेरिति चेत् मैवं अहमित्यध्यासोविद्या तस्याः कार्यकर्तृत्वादि तस्याः मूलं मूलाज्ञानं यथाहुः तम
तमेवं लक्षणमध्यासं पंडिता अविद्येति मन्यंते इति मास्तु तर्हि जीवन्मुक्तिस्तत्राह तथाचेति॰ श्रोत्रियं ब्रह्मनिष्ठमिति विशेषणेनात ७७
त्रसाक्षात्कारस्यैवाचार्यत्वात् तस्यचसद्यएवमुक्तत्वात् कउपदिशेत् तदभावे कथं ब्रह्मविद्यासंप्रदायः प्रवर्त्ततामिति वेदांतानाम
वोधकत्वलक्षणमप्रामाण्यप्रसज्येतेत्यर्थः ननु तत्वज्ञानोत्तरमेव देहपातः इत्ययुक्तं देहकारणस्य प्रारब्धकर्मशेषस्यसत्वात् नचत
दपितत्वज्ञाननिवर्त्यं अविरोधात् तदुपजीव्यत्वाच्चेति तत्राह ॥१०॥

निस्माशानलाइष्टेः २

नचेति॰ यद्यपिप्रारब्धकर्माविरोधित्वज्ञानंतथापिप्रारब्धंकर्मनतावन्निरुपादानंभावकार्यत्वाद्घटवत्‌ सोपादानंचेत्किमात्मोपादानं।
अविद्योपादानंवानाद्यः आत्मनोऽकारणत्वेनतदुपादानत्वानुपपत्तेः द्वितीयेत्वत्र दिशा॰ विद्यानिवृत्त्यानिवृत्तिरवाप्यमनूद्य दूषयति प्रा
रब्धस्यापीति॰ द्वितीयमनूद्य दूषयति नचेत्यादिना उत्तरकालएवेति॰ प्रारब्धकर्मशेषनिवृत्त्युत्तरकाले इत्यर्थः अज्ञानेन निवर्तनेनेति॰ प्रा
रब्धकर्मशेषभोगानुगुणावरणशक्तिं ज्ञानमपनयति नतु तद्विक्षेपशक्तिं निवर्तयति तथाचाज्ञानस्यधर्मिणोनिवर्तकाभावान्ननिव
र्तनेत्यर्थः ज्ञानव्यतिरिक्तमज्ञानस्यनिवर्तकमाशंक्यपरिहरति नचेति॰ तस्यानिवृत्तेरित्यर्थः ननुननिवर्तकाभावोजीवस्यैववाविद्यानिव।
नचप्रारब्धकर्मसामर्थ्याद्देहपातोनास्तीतिवाच्यं प्रारब्धस्याप्यविद्याकार्यत्वात्तदभावेस्यानुमशक्यत्वात्तंत्वभावेपटस्येव नच
प्रारब्धकर्मफलभोगनिर्वाहकतयाकियत्कालमविद्याप्यनुवर्ततएवेतिवाच्यं विद्याया अविद्योपमर्दकत्वस्वभावत्वादतिप्रसं
गात् नचोत्तरकालएवतथास्वभावएकस्यस्वभावद्वयानभ्युपगमात् नचावरणशक्तिप्रधानमज्ञानंनिवृत्तमेवविक्षेपश
क्तिप्रधानंत्वनुवर्ततेप्रारब्धनिर्वाहायेतिवाच्यं अज्ञानद्वयाभावात् नचैकमेवशक्तिद्वयविशिष्टमेकस्ययुगपत्स्थितिनिवृ
त्त्योर्विरुद्धत्वात् नचशक्तिनिवृत्तिमात्रमेवविवक्षितंशक्तिशक्तिमतोरभेदात् भेदेवाऽज्ञानंननिवर्ततेतनचप्रारब्धनिमित्तन्निवृत्ति
रितिवाच्यं तस्याप्रमाणत्वात् नचतदनंतरंज्ञानमेवाप्रतिबद्धंतन्निवर्तकमितिवाच्यं प्रारब्धनाशेदेहपातानंतरंज्ञानस्यैवाभावात्
र्तकत्वात् तर्हि जीवन्मुक्तिविरोधइतिचेन्नप्रारब्धशेषेणप्रतिबंधत्वात् अप्रतिबद्धस्यैवकारणस्यकार्यजनकत्वात् कर्मशेषनिवृत्तौप्र
तिबंधाभावादप्रतिबद्धंतत्त्वज्ञानंमुपमर्दिष्यतीत्याशंक्यपरिहरति नचतदनंतरमिति॰ नचवाच्यमित्यन्वयं हेतुमाह प्रारब्धेति॰ ननुप्रार
ब्धकर्मनाशोसतिपश्चाद्देहोनपततितन्नाशस्यदेहनाशहेतुत्वात् ततश्चप्रारब्धनाशोत्तरमवस्थायामप्रतिबंधासंभवाद्देहोदयस्थितिमपदव
स्थस्यसत्वात्तदाज्ञानेनजायतामित्याशंक्यनाशंविशिनष्टि देहपातानंतरमिति॰ प्रारब्धकर्मशेषोहिदेहएवनतत्कारणीभूतः कश्चिदन्योस्ति
शेषशब्दवाच्यः कर्मणोदेहादिफलरूपेणपरिणतस्यरूपांतराभावात् तथाचशेषनाशपदवदेहपातइतितदनंतरंकारणाभावात् ज्ञा

प्रारब्धकर्मेति इत्यनंतरंस्मृ।

नसान ४

ननुनिवर्तका नावोसिद्धः ज्ञानस्यैव तिषा २

हुर्वज्ञानस्यचप्रारब्धेनप्रतिब

न्धत्वात् ॥१०॥

नमेवनास्तीतिकिमज्ञानंनिवर्त्येतइत्यर्थः ॥१०॥

९२

ननुयद्यपिमूलाज्ञानंनिवृत्तंतथापितत्संस्कारोनुवर्त्ततेनेनचज्ञानक्रिययोरेवसंस्कारः नाशमात्रप्रयुक्तत्वात संस्कारस्यतत्रमात्रापरोक्षात्मनः सं
सि॰ स्कारत्वतणादोषवशात देहाद्यनात्माकारावभासइतिस्यादेवजीवन्मुक्तिरितिपक्षंदूषयति नवेति॰ ज्ञानक्रिययोरेवसंस्कारइतिनियम
मु माश्रित्यसंस्कारशब्दस्यार्थान्तरमाह लेशेति॰ लेशाविद्याविद्यावस्थाविशेषइत्यर्थः तत्रदूषणहेतुमाह तस्यापीति अयमर्थः संस्का
७८ रोनतावदनादिः संस्कारत्वाभावप्रसंगात सादित्वेत तदुपादानमात्माऽविद्यावानाद्योनिर्विकारत्वात अविद्याचेन्नहितस्याः नाशे
सोपिकथंस्यात उपादानाभावात भावकार्यस्यसोपादानत्वनियमात इमिनत्वविद्यैवलेशशब्दवाच्यासंस्कारशब्दार्थः इतितत्राह
अविद्येति॰ अवस्थावस्थाविद्यातोभेदाभेदाभ्यांअनिरूपणात शक्तिपक्षोक्तदोषप्रसंगाच्चायुक्तत्वमितिभावः ननुतस्यतावदेवविरे
सवत्त्वावत्तिरिवप्रजहातियदाकामान सर्वान्पार्थमनोगतान इत्यादिशास्त्रशतप्रामाण्यात ज्ञानिनोविदेहकैवल्यप्राप्तौविलंबप्रतीतेः

नवाविद्यासंस्कारोलेशाविद्यादिशब्दाभिधेयोनुवर्त्ततएवेतिवाच्यंतस्याप्यविद्याकार्यत्वादविद्यामात्रेत्वेवसंस्कारशब्दप्रयोगादे
यथ्यात जीवन्मुक्तिप्रतिपादकस्फूर्तिस्मृतिप्रामाण्याद्धिदुषोदेहस्थितिः कल्प्यतइतिचेत नशास्त्रस्यजीवन्मुक्तिप्रतिपादने
प्रयोजनाभावात मुमुक्षूणांश्रवणादौप्रवृत्तिः प्रयोजनमितिचेत अस्तुतर्हिश्रवणादिविधेरर्थवादस्तत्शास्त्रम् ॥१०॥ जीवन्मुक्तिप्रतिपादिकशास्त्रस्य।

शरीरस्थितिः कल्प्यतइतिजीवन्मुक्तिवादीशंकते ॥ जीवन्मुक्तीतिदेहस्थितिमन्तरेण विनाकर्मानुपपन्नाकर्मस्थितिमपिकल्पयतीति
भावः उभेहैवैषएतेनतरतिभिद्यतेहृदयग्रंथिः ज्ञानाग्निः सर्वकर्माणीतिश्रुतिस्मृतिविरोधात्कल्पनमनुपपन्नमितिपरिहरति॰ नेति॰
ननुतर्हिविरोधइतिचेत नजीवन्मुक्तिशास्त्रस्याध्ययनविधिविरोधेनस्वार्थापरत्वादित्याह शास्त्रस्येति॰ यद्यपिजीवन्मुक्तिप्रतिपादनं ७८
नसाक्षात्प्रयोजनंतथापिस्वरूपात्मसाक्षात्कारहेतुविचारादौप्रवृत्तिजनकतयापरंपरयाप्रयोजनमितियुज्यतएवस्वार्थपरतेतिजीव
न्मुक्तिवादीशंकते मुमुक्षूणामिति॰ तर्हिजीवन्मुक्तिशास्त्रंकिंविचारादौसाक्षादेवमुमुक्षून्प्रवर्त्तयति उततद्विधायकवाक्यशेषतया
नाद्यः विचारविधायकपदाभावात द्वितीयमंगीकरोति॰ अस्तुतर्हीति॰ तथाचनस्वार्थेप्रामाण्यमित्यर्थः ॥१०॥

जीवन्मुक्ति प्रास्त्रेण १ मू

तथा

ननु प्रमाणविरोधेन तत्संवादे वानार्थवादानां प्रामाण्यं न चात्र तदस्ति ततो देवताधिकरणन्यायेन स्वार्थेपि प्रामाण्यं किं न स्यादित्याशंक्याह तथेति।
लौकिकं प्रमाणमन्वयव्यतिरेकौ मतिश्रुति साक्षात्कारो सविलासाविद्योपमर्दः तदभावे नैवंरूपो वैदिकप्रमाणं भिद्यते हृदयग्रंथिरि
त्यादिना तो विरोधान्न देवताधिकरणन्यायावतार इति ननु यथा मुक्तेषु कर्मणः प्रारब्धवेगस्य [illegible]त्यादेवतयो नान्यथा एवं प्रारब्धकर्म।
णाभोगलक्षणकार्यतयादेवतयो नाम्येथ तिसाधितेव शास्त्रकारैः प्रारब्धस्थितिरिति शंकामुन्मूलयति नचेति। परिहारः स
ष्टार्थः ननु सूनारब्धकार्ये एव तु पूर्वे तदवधेरिति सूत्रकारैः नत्वारब्धकार्ये सामिभुक्तफलेत्यादिग्रंथेन भाष्यकारैः नत्वारब्धविपा
कसंपादितजात्यायुर्वि[illegible]तेत्यादिना वाचस्पतिमिश्रैः ननु कर्मणामपि निहतत्वात् कथं हि तद्दर्शनेनैष दोषस्मादिना विवरणवा।
तथा च लौकिकवैदिकप्रमाणविरोधात्मनेन कथं विदुषो देहस्थितिः कल्प्यते न च मुक्तेषु दृष्टांतेन प्रारब्धस्थितिः साधितेति वा।
च्यं दृष्टांतवैषम्यात् तत्र कर्मोपादानस्येषां नाशात् न च जीवन्मुक्तो सार्वलौकिकी प्रसिद्धिरस्तीति वाच्यं प्रमाणवि।
रहेण प्रसिद्धेरंधपरंपरारूपत्वात् न चाप्रामाणिकस्य शास्त्रकारैरुपपादनमनर्थकमिति वाच्यं शिष्यस्याविहृतया गुराववि
श्वासपरिहारप्रयोजनत्वेन तस्यार्थवत्वात् तस्माद्विद्याया अविद्योपमर्दकत्वस्य स्वाभाव्यात् विदुषः सद्योमुक्तावुपदेष्टुरेवाभावा
त्कुतो विद्योत्पत्तिः न चाचार्यनिरपेक्षैव विद्येति सांप्रतं आचार्यवान् पुरुषो वेद नैषा तर्केण मतिरापनेया प्राप्य वरान्निबोधत आ
र्यैः प्रारब्धफलशेषैकहेतुत्वात् देहसंस्थितेः रागादिप्रत्ययोद्भूतिरिषुचक्रादिवेगवदित्यादिभिर्वार्तिककारैर्जीवन्मुक्त्युपपादनं अ
प्रमाणिकत्वादनर्थकमापतेदतो युक्तमिति शंकापराचष्टे नचाप्रामाणिकस्येति। एवं सर्वदोषापनेतृत्वेनोपपादितां सद्योमुक्तिमुपसं
हरन् पूर्वपक्षफलमाह तस्मादित्यादिना ननु विद्योत्पत्तौ किमाचार्यैः करिष्यति स्वयमेव तर्कादिना विद्यासंपादनसंभवादित्या
शंक्याह नचेत्यादिना आपनेया प्रापणीयेत्यर्थः वरानुत्कृष्टानाचार्यानित्यर्थः स्पष्टार्थौ श्रुतयः सद्योमुक्तिरेव साधुः पक्षः तर्हि
विद्यासंप्रदायाभावाद्विद्यानुपपत्तिप्रसंगं परिहरति नैष दोष इति स्वाज्ञानकल्पितस्य गुरोरुपदेष्टुः सत्वात्

ननुकल्पितस्य मिथ्याभूतस्य कथमुपदेष्टृत्वं तत्त्वेवार्थक्रियाकारित्वात मिथ्यात्वानुपपत्तेरित्याशंक्य श्लोकेन प्रत्याह कल्पितोपीति॰ उपदेष्टा सम्मा
सि॰ दिशादित्यन्वयः उपदेष्टाऽऽचार्यः नत्वाचार्यो नास्तीत्युक्तं न त्वाह कल्पितोपीति॰ सत्यवदित्यपेरर्थः ननुकल्पितत्वे उपदेष्टृत्वं नयुक्तं निस्तत्त्वा
मु॰ ३ दित्यत आह यथाशास्त्रमिति॰ निस्तत्त्वं यदि स्यात्तत्र श्रृंगीकारात् यदि मिथ्यात्वं शास्त्रवद्धेदवत् यथाकल्पितोपि वेदः स्वार्थं बोधयति एवमा
७९ चार्योपीत्यर्थः कल्पितत्वस्य तत्त्वसाक्षात्कारात् प्रागज्ञानात् तदुत्तरं च गुरोरनपेक्षणान्न दोष इति भावः ननु एकमेव जीवस्तेनैतद्विद्या कल्पिता
इति भवतो मतं तत्र किं शिष्यज्ञानेन न गुरुः कल्पितो गुर्वज्ञानेन न शिष्यस्य विनिर्गमः शिष्यस्य श्रवणादौ प्रवृत्तिर्न भवेदिति नेत्याह नचेत्यादिना श्लो
केन व्याचष्टे यद्यपीत्यादि॰ इत्यादिना व्याख्या न स्पष्टं ननु शास्त्रं न कल्पितं तस्यापौरुषेयत्वादिति मीमांसकास्तान् प्रति उदाहरणान्तरमाह प्रतिबिंबवच्चे

कल्पितोप्युपदेष्टा स्याद्यथाशास्त्रं समादिशेत् नचाविनिर्गमो दोषो विद्यावत्त्वेन निर्णयात् ४। यद्यपि विद्वांस्तदानीमेव मुक्तत्वात्स्या
मार्थिकः कश्चिदुपदेष्टा नास्ति तथापि कल्पितेन गुरुणा विद्योत्पत्तिसंभवात् नानुपपत्तिः काचित् नच कल्पितस्य कथं सत्यज्ञानज
नकत्वमिति वाच्यं शास्त्रवदुपपत्तेः प्रतिबिंबवच्च न च गुरुशिष्ययोर्मध्ये कतरः कल्पितस्तस्याविनिर्गमो दोष इति वाच्यं अविदुषः कल्पक
त्वात् गुरोश्च विदुषः कल्पनाबीजाभावेन तत्त्वानुपपत्तेः तस्मात्कृत्स्नाचार्यप्रसादप्रसादितत्त्वमस्यादिवाक्यान्यसाक्षात्कारेण मो
हाविर्भावप्रतिबंधज्ञानतत्कार्यतिरस्कारसमनंतरं नित्यशुद्धबुद्धमुक्तस्वभावाद्वितीयानंदोऽस्मीति मन्यते ततः कृतकृत्यो भवति ॥०
ज्ञा

ति विमतं बिंबपूर्वकं प्रतिबिंबत्वात् संमतवत् अत्र कल्पितमपि प्रतिबिंबं बिंबमतीतिहेतुरिति यथा स्वीक्रियते तथा प्रकृतेपीत्यर्थः ननु तत्र
प्रतिबिंबज्ञानमेव हेतुर्न प्रतिबिंब इति वाच्यं ज्ञानमात्रस्याहेतुत्वात् प्रतिबिंबावच्छिन्नस्य तत्त्वप्रतिबिंबस्यापि तद्धेतुत्वाद्विद्यानादिति श्रुतात्मा ७९
नाकल्पितत्वात् भेदस्य च निर्वक्तुमशक्यत्वात् प्रमत्तादेस्तत्त्वगोचरत्वानुपपत्तेश्च विद्यायाश्चाविद्योपमर्दस्वभावत्वाद्विद्यायाश्चाचार्योपदिष्ट
तत्त्वमस्यादिवाक्येभ्यो ऽन्वयादिनाऽऽपादितत्त्वंपदार्थस्यापि कारिणो लक्षणयोत्पत्तिसंभवात् उत्पन्नया च विद्यया संवित्सुखात्मकब्रह्मा
त्मैक्यावरकाज्ञानोपमर्दो निरवद्यसंवित्सुखात्माऽहमस्मीति स्वरूपेणावस्थितः कृतकृत्यो ऽधिकारी संपद्यत इत्युपसंहरति तस्मादित्या

उक्तेर्थे ग्रंथाद्यवाक्यानिविष्टपदानि निवेशयति अतइति॰ पूर्वोक्तयुक्तीनां श्रुतिमूलत्वयाभासत्वं प्राकट्यं श्रुतीरुदाहरति विज्ञानमित्यादिना अ
नेकशाखासु विद्यमानाः श्रुतीरुदाहरति आत्मनः आनंदात्मकवाक्यानां स्वार्थतात्पर्यलिंगमभ्यासं दर्शितः नकेवलं श्रुतिप्रामाण्यमात्रेणा
नंदरूपत्वं किंतु युक्त्यापि मैत्रेयीब्राह्मणे श्रुत्यादिनमानंदमयत्वमात्मनश्चतिहेत्वंतमाह नवा अरे इत्यादिना श्रुत्यर्थोतिस्पष्ट एव ननु सुखादेरा
त्मात्मनः आनंदरूपत्वस्येति वदतात्मनि ब्रह्मण्यानंदत्वं धर्मः प्रतीयते न पुनः स्वरूपं विज्ञानादिशब्दान्न ब्रह्मणि प्रयुज्यते नाते विधर्मी अर्थाद्युक्तास्तत्र मे
विद्यामारभते नन्विति॰ मैत्रेयीब्राह्मणे नैवेति आत्मनिष्ठानं भवंतीत्यर्थः आनंदादयो धर्मा आत्मनि संतीति पक्षे हेत्वाविकल्प्यमाह आद्यइति॰ अ
यतः सुषुप्तमात्मानमानंदं साक्षाद्धि तिष्ठेत्येति विज्ञानमानंदं ब्रह्म को ह्येवान्यात्कः प्राण्याद्यद्येष आकाश आनंदो न स्यात् एषा ह्येवानं
दयमीमांसा भवतीत्यारभ्य पश्चायं पुरुषेयआमावादित्ये स एकएवेत्यंते भृगुर्वैवारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेत्या
रभ्यानंदो ब्रह्मेति व्यजानादित्यंते यो वै भूमा तत्सुखं नाल्पे सुखमस्तीत्यादि श्रुतिशतेभ्यः नवा अरे पत्युः कामाय पतिः प्रियो भवति
आत्मनस्तु कामाय पतिः प्रियो भवतीत्यारभ्य नवा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतेन
श्रुत्यादेनाद्य आत्मनः आनंदस्वरूपत्वस्य नत्वानंदादयो धर्मा आत्मनि संतीति नवा आद्योयेने किं सत्या असत्यावानाद्यः हेतायेतः नचेतरः
धर्मिणः नानंदत्वापत्तेः नहि रजतत्वं यत्रारोप्यते तद्रजतं नचानानंदत्वमानंदभिन्नत्वं तदपि नास्तीति वाच्यं तथाप्यानंदरूपत्वासिद्धेः
सत्या आरोपिताश्चेत्यर्थः सत्यत्वं कालत्रयेप्यबाध्यत्वमिति पक्षं हेतायत्त्या ((नद्वितीयः आनंदत्वानाप्त्ये आनंदव्यवहारादर्शनात ॥०
दूषयति नाद्यइत्यादिना कल्पितपक्षं दूषयति नचेतरइति॰ किंस्वरूपेणानंदत्वं कल्पितं उत आत्मन्येव तत्कल्पितमिति आद्यं दूषयति य
र्मिणाइति॰ किमप्यानंदरूपं न भवेदित्यर्थः द्वितीयमर्थांतरन्यासेन दूषयति नहीति॰ ननु किमिदमापाद्यमानमनानंदत्वमानंदभिन्नत्वं
वा आनंदत्वानधिकरणत्वं वा आद्ये वेदांतिनं प्रति आपाद्याप्रसिद्धिरित्याशंक्याह नचेति॰ आनंदभिन्नत्वेनापाद्यमित्यभिप्रेत्याह तथापी
ति॰ आनंदरूपत्वाः सिद्धिमुपपादयितुं प्रसंगात आत्मन्यसत्यपक्षमपि दूषयति नद्वितीयइति॰ व्यवहारोऽभिवदनरूपः आनंदपदस्याने
दत्वविशिष्टएव गृहीतसंगतित्वात्तदनधिकरणे घटादावानंदपदप्रयोगलक्षणव्यवहारादर्शनवदात्मन्यपि तथा स्यादित्यर्थः ॥०॥

तत्राह

प
ननु स्थितेषु आनंदेषु वैषयिकेषु आनंदपदशक्तिग्रहे आनंदस्य व्यभिचारदोषात् परिहारायानंदत्वं क्रोडीकृतेषु प्रवर्तितानामानंदशब्दः अयं तु।
सि ब्रह्मानंदेनोपस्थितः सर्वप्रमाणातीतत्वेनालौकिकत्वात् ततः आनंदत्वानधिगमाद् ब्रह्मानंदे लौकिकव्यवहाराभावप्रसंजनेनातिष्ठयो वैभू
मु. मातत्स्वत्वमिति वैदिकस्वरादि शब्दप्रयोगादानंदव्यवहारः परीक्षकाणां युज्यते स्वर्गस्वत्वादिव्यवहारवत् इति शंकां दूषयति नचेति·
१० तर्हि ब्रह्मानंदे वेदादानंदव्यवहारे वक्तव्ये प्रष्टव्यः किं पदार्थतया वेदो अलौकिकानंदं प्रतिपादयति उत वाक्यार्थतया नाद्य इत्याह लौकिकेति·
ननु प्रमाणातीतत्वात् तातीतत्वाभ्यां विशेषउक्तः अन्यथेति यथा नीलपीताद्यवांतरभेदेपि पटव्यक्तीनां पटत्वेनोपस्थितानां पटशब्दवाच्यत्वमे
वमवांतरभेदेपि सर्वानंदव्यक्तीनां सामान्यानंदत्वेन क्रोडीकृतानां युज्यते एव आनंदशब्दवाच्यत्वं नच लौकिकशब्दप्रसंगतिर् हीनानवै
दिकानंदशब्द इति वाच्यं लौकिकवैदिकशब्दयोरभेदात् स्वराद्युपाधिकत्वात् भेदव्यपदेशस्तथा चानंदत्वानाश्रये आत्मन्यानंदव्यवहा

नचसर्वव्यवहारातीतो लौकिकपदवाच्यमानंदः लौकिकवैदिकपदार्थयोरेकत्वात् अन्यथा लोकवेदाधिकरणविरोधः
नच वाक्यार्थ एव वाच्यमानंदः तेनाप्यानंदत्वाप्रतिपादनात् अविरुद्ध एव तात्पर्यात् ॥१०॥

रोनेव युज्यत इत्यर्थः प्रमाणलक्षणोक्तं प्रयोगचोदनाभावादर्थैकत्वमविभागात् आकृत्यधिकरणे पोदह्यातत्पा लोकवेदयोः पद
पदार्थान्यत्वानन्यत्वे विचार्येते तत्र लोकवेदयोः तावत्पदान्यत्वं स्वरादिधर्मभेदात् पदान्यत्वात् तदर्थोपि भिद्यते इति प्राप्ते सिद्धांतः अर्थैः
कत्वपदपदार्थयोरेकत्वं कुत इति चेत् अविभागात् प्रत्यक्षप्रत्यभिज्ञानात् य एव ह्रीवर्णा लौकिके पदे प्रतीयंते त एव वैदिकेपि पदे प्रत्यभि
ज्ञायंते वर्णात्मकं च पदं ततो न लौकिकपदाद्वैदिकं पदं भिद्यते यत्तु धर्मभेदात् भेद इति अधर्मभेदे हेतोरेव धर्मभेदस्य भेदे हेतुत्वात् नच सैवधर्
व मीभेदे हेतुः एव युक्तं नैवैकल्पिक स्वरादे र्व्यभिचारात् पंक्तमतिक्रियाकारकसंसर्गात्मक प्रयोगचोदना अप्युपपद्यंते अन्यथा वैदिकप
दार्थज्ञानोपायाभावात् संबंधस्य वाशास्त्र हेतुत्वात् नासामभावः प्रसज्येत इति अथानंदस्वरूपं वाक्यार्थतया वेदः प्रतिपादयति इत्य
त्रानेतदपि दूषयति नचेति· पूर्वपक्षे वाक्यार्थस्य सर्वज्ञालौकिकत्वात् न लोकवेदाधिकरणविरोध इति भावः ब्रह्मानंदस्यकाम्यमान।

व्यवहारातीतो लौकिकत्वमिति वेदान्तसार ॥१०॥ १०

नचेति॰ आनंदत्वाधिकरणत्वानधिकरणत्वाभ्यामात्मनि द्वैतापत्त्यादिदोषप्रसक्तौ तत्परिहारत्वेनैकदेशीसंक्षेपशारीरकाचार्यमतमुत्थापयति
अत्रैके त्विति॰ तदुक्तं ब्रह्मेतरराशिरविलना स्व वपुःषि तेषां बुद्धौ स्फुरंत्यपरु रूप निवृत्तिभावादिति॰ आत्मानंद इतिकोर्थः इत्यपेक्षायामनानंदव्या
वृत्तिमात्रं तेनानानंदव्यावृत्त्युपाधिनात्मन्यानंदशब्दः प्रवर्त्तते नानंदत्वधर्मपुरस्कारेणेति तेनोक्तविकल्पावकाश इति नन्वधर्मवत्त्वाद्व्यावृत्तिरपि सा
त्यसतीवेति पूर्वोक्तदोषतादवस्थ्यमिति तत्राह नचेति॰ एवमानंदत्वधर्मप्रयुक्तं दूषणं प्रतिक्षिप्य नत्वं न्यायेन ज्ञानत्वादिधर्मप्रयुक्तमपि दूषण
ज्ञातं प्रतिक्षिपति एतेनेति॰ अज्ञानव्यावृत्तिरेव ज्ञानशब्दात् प्रतीयते न तद्रूप एवात्मनि ज्ञानशब्दप्रवृत्तिनिनत्वज्ञानत्वविशिष्टे आत्मनीत्यर्थः व्या
वृत्तिः किमात्मन्यानंदादिशब्दप्रवृत्तावुपाधिः उतवाच्या आद्यं निरस्यति नचेति॰ आत्मव्यतिरिक्तत्वाभावेनोपाधित्वायोगात् द्वितीयं दूषयति

नचसर्वथाप्यलौकिकेसुखेकस्यापिकामनासंभवति स्वर्गादेरपिलौकिकसुखसजातीयत्वात् अत्रकेचित अनानंदव्यावृत्तिमात्रमा
नंदत्वं ननु प्रसिद्धआनंद एवात्मा धर्मधर्मिभावानभ्युपगमात नचव्यावृत्त्यापि द्वैतापत्तिः तस्या आश्रयानतिरेकात एतेन ज्ञान
त्वादयो व्याख्याताः तत्र व्यावृत्तेरपदार्थत्वात् आरोपादेवादायनेस्त्र व्यावर्त्तकधर्मस्यावश्यंवक्तव्यत्वात् अन्यथाव्यावृत्त्यसिद्धेः न
च स्वरूपेणैव व्यावृत्तिः आत्मनः व्यावृत्तत्वादन्यथाअव्रह्मत्वापत्तेः अन्ये त्वानंदत्वादयो धर्मा यत्र कल्पितास्त एव आनंदादिपदा
र्थाः लोकेपि प्रसिद्धाः तत्राप्यानंदत्वादीनां कल्पितत्वात् नचैतावता आनंदस्य काचित्क्षतिः इति स्तिधर्मस्यानुपादेयत्वात्तदाश्रयस्यके

व्यावृत्तेरिति॰ अन्योन्याश्रयप्रसंगादपोह्वादोनयुक्त इत्यर्थः विवरणाचार्यमतमुत्थापयति॰ अन्येत्विति॰ लोकेपीत्यपिशब्दो लौ
किकात्मानंदसंग्रहार्थः ननु वैषयिकं सुखं लोके आनंदः नचतत्रानंदत्वं कल्पितमबाधादित्याशंक्याह तत्रापीति॰ धर्मधर्मिभावस्य भेदा
भेदाभ्यामयुक्तत्वादित्यर्थः नन्वात्मा कल्पितः कल्पितधर्माधारत्वात् मिथ्यारजतवदिति तथाच पुरुषार्थतया नोपादेयः स्यादिति
तत्राह नचैतावतेति॰ कल्पितरजताधारशुक्तिकाशकलेव्यभिचारादितिभावः ततश्चाविमतआत्मा आनंदरूप आनंदत्वाधिकरणत्वा
त लौकिकानंदवदित्यर्थः एवंचानंदत्वधर्मपुरस्कारेणानंदशब्दः आत्मनि प्रवर्त्तते तस्य च कल्पितत्वान्न द्वैतापत्तिरित्युक्तं भवतीतदनन

व्यावृत्तेर्व्यावर्त्तकधर्माधीनत्वेन व्यावर्त्तकधर्मस्य च व्यावृत्त्यधीनत्वात्

सि· मु· ८१

तदपीति· अत्रायमाशयः आनंदत्वमानंदशब्दप्रवृत्तावुपलक्षणं उत विशेषणं नाद्यः शक्त्यानंत्यप्रसंगात् व्यक्तिविशेषाप्रतीतिप्रसंगाच्च द्वि-
तीयेपि विशिष्टमतिरिक्तमनतिरिक्तं वा आद्यं दूषयति विशिष्टस्यैवेति तथा चाखंडवाक्यार्थासिद्धिरिति भावः द्वितीयं दूषयति कल्पि-
तेति· इममेवार्थं स्पष्टयति नहीति· अत्र विपक्षे बाधकमाह अन्यथेति अत्रायमाशयः कल्पितधर्माश्रयस्य न वस्तुतस्तत्स्वरूपत्वे
अन्यथा धर्मस्य कल्पितत्वमेव न स्यादिति किं चात्मा कल्पितः कल्पितधर्माश्रयत्वात् मिथ्यारजतवत् न च शुक्तौ व्यभिचारः शुक्ति-
स्वरूपाप्रयुक्तत्वात् तदाधारत्वस्य अन्यथा रजतादेरनिवृत्तिप्रसंगात् प्रतातायाश्च शुक्तेर्विशिष्टत्वेन शुद्धशुक्तिस्वरूपत्वाभावात्

द्या

तदप्यापातरमणीयमिव प्रतिभाति विशिष्टस्यैवानंदपदार्थत्वात् व्यक्तिमात्रे तदनुपपत्तेः कल्पितानंदत्वाश्रयस्यानानंदत्वप्र-
संगान्निवृत्तेश्च न द्वितीयाधर्मीयश्च न स्वाभाविकस्तदंतर्भावितः पदार्थः सम्भवति अन्यथा शुक्त्यादेरपि रजतपदार्थत्वापत्तेः अत्रो-
च्यते उपाधिसंसृष्टो यात्मा वानंदत्वतदाश्रयः विशिष्टशक्यपदे तु व्यक्तिर्वा शक्तिगोचरः यद्यपि लोके आनंदत्वविशिष्टपदा-
नंदपदार्थस्तथाप्यात्मैवानंदपदार्थो मुख्यः एकस्यैव तत्तदुपाध्यनुप्रविष्टस्यानुगतव्यावृत्तिबुद्धिजनकतया जातिव्यक्त्युभयरू-
पत्वोपपत्तेः यथैकस्मिन्नेव स्वरूपे सर्वकल्पनाधिष्ठाने मुखचंद्रादौ बिंबप्रतिबिंबस्वरूपमिति द्विविधव्यवहारस्योपाध्यनुप्रविष्टत्वा-

तेनान व्यभिचार इति एवमेकदेशिनो पराकृत्य स्वपक्षसिद्धांतयति अत्रोच्यते इति विशिष्टस्यानंदत्वधर्मविशिष्टस्यानंदस्यानंदशब्दशक्यत्व-
पक्षे आत्मैवोभयथाप्यानंदशब्दार्थः विशिष्टं हि विशेषणाद्यात्मकमेव तथा च विशेषणमानंदत्वं सामान्यं तदाश्रयाच्च व्यक्तिरुभय-
मात्मैव यतः कथं उपाधिषु मनोवृत्तिविशेषेषु प्रतिबिंबित आत्मानंद एव च्छिन्नो व्यक्तिरूपतां प्रतिपद्यते तासूपाधिभिन्नास्वात्मानंदव्य-
क्तिषु बिंबवदनुगतबुद्ध्युत्पादकत्वात् सामान्यानंदत्वरूपतां भजते इति सर्वात्मना स एव मुख्य आत्मानंदशब्दार्थः एवं व्यक्तिरेवानुगतबुद्धि-
हेतुत्वात् सामान्यशब्दाभिधेया विशेषाकारबुद्धिहेतुत्वात् व्यक्तिशब्दितेति तदुक्तं तत्रभवत्कारैः न हि जातिर्नाम व्यक्तेरर्थांतरभूतं किमपि
तत्त्वमस्त्यपि तु वस्त्वेव हि एकं व्यावृत्तमनुगततया वृत्तमिति आत्मन एवोभयरूपत्वं लोकाप्रसिद्धमित्यभिप्रेत्य पक्षांतरमाह व्यक्तिर्वेति·

८१

यथा विशेषणे ऽलेकेनैव विशिष्टैक्यमापाद्यते त
था विशेष्यानेकत्वेन विशिष्टस्यानेकत्वमपि क्रियते नापाद्यते

व्यक्तिर्वेति पक्षमुपपादयति अथवेति नन्वनुव्यक्तिपक्षे सर्वासु व्यक्तिषु शक्तिग्रहः क्वचिदेव वा नाद्यः आनंत्येन सर्वासामनुपस्थितेः न द्वितीयः यासु व्यक्तिषु शब्दस्य वाच्यवाचकसंबंधो गृहीतस्ततोऽन्यत्र प्रवर्त्तमानः शब्दः स्ववाच्यं व्यभिचरेत् ततो न व्यक्तिः शक्येति चोद्यं परिहरति नैवेति यत्रोभयोः समो दोष इति न्यायेनैव हेतुमाह विशिष्टेति आनंत्यादिदोषोपपादनाय विशिष्टस्यानेकत्वमाह विशेषणाभेदेपीति न च विशेषणैक्येन विशिष्टस्यैक्यं संपाद्यत इति युक्तं अशक्यत्वात् नापि तत्साम्यं असत्वात् तस्माद्विशिष्टवाच्यतापक्षेप्यानंत्यादिदो

व्या षो तथैवेत्यर्थः कथं तर्ह्यननुगतव्यवहारो वाच्यव्यक्तेरन्यथानुपपत्त्या प्रतीतिरित्यानंत्यादिपरिहारस्त्वेतितत्राह तस्मादिति ननु कथ

मशक्येन लक्ष्येत यतो गोपदात् गोत्वविशिष्टव्यक्तिः प्रतीयत इति तत्राह तत्रापीति प्रतीतेरन्यथासिद्धिः शक्तिग्रहादिति संस्का

अथवा व्यक्तिरेव सर्वत्र पदशक्तिगोचरोस्तु न च व्यक्तीनामानंत्यात् शक्तिसंबंधव्यभिचारदोषप्रसंगः विशिष्टशक्यपक्षेपि त त्यत्वात् विशेषणाभेदेपि विशेष्यभेदेन प्रतिविशेष्यं विशिष्टभेदात् तस्मादशक्येनापि शक्यतावच्छेदकेनानुगतशक्य व्यवहारः शक्यव्याहृतिव्यवहारयोर्जनयितुं शक्यत्वात् तत्रापि शक्तिकल्पने मानाभावात् कारणस्वरूपवह्निभूतकारणता वच्छेदकवत् तस्मादानंदस्वरूपत्वेप्यात्मनो न काचिदनुपपत्तिः आनंदरूपमात्मानं सच्चिदद्वयतत्वकं अपूर्वादिप्रमाणै कप्राप्याहं तद्दृढः स्थितः ४४ ॥ रामाय नमः ॥

रवणात्तदुपस्थितेरित्यर्थः नन्वेवं तथाप्यानंदादिपदादुक्तसंस्कारसचिवादानंदत्वविशिष्टात्मप्रतीतेर्न शुद्धस्य लक्षणया पदादुपस्थि तिरिति शंकां पराकुर्वन्नुपसंहरति तस्मादिति आनंदत्वमप्यात्मैव व्यक्त्यतिरिक्तसामान्यानभ्युपगमादुपाधेस्तटस्थतया शुद्धस्यैव प्र तीतेरित्यायाचेदितत्वान्न दोष इति भावः एवमात्मनः आनंदादिरूपत्वं श्रुतियुक्तिभ्यां निर्णीतवाक्यान्याहृतमात्वात् कारात आव रकाज्ञानेऽपसृते स्वात्मा रामः आचार्यः स्वसहृतहृत्पतामभिनयति आनंदरूपमिति प्राप्यसाक्षात्कृत्य सदादितत्वकत्वे प्रमाण माह अपूर्वादीति तद्दृढस्तदात्मक इत्यर्थः ततः शब्दलक्ष्य शरीर इति वा ॥०॥ ❀

ननु सद्रूपस्याद्वयात्मकत्वमनुपपन्नं प्रमाणविरोधात् तत्राह योऽहमिति· अद्वयस्य सद्रूपत्वेनाधिष्ठानत्वात् तदन्यत्वस्याज्ञानकल्पितत्वात् तस्यती
तेभ्रमत्वात् अद्वयात्मकत्वं प्रमाणाविरुद्धमिति भावः ननु ब्रह्मसत्वाधिष्ठानमित्यनुपपन्नं नास्ति ब्रह्मेत्येव प्रतीतेरित्याशंक्यास्ति ब्रह्मेति वेद
देत्यादिश्रुति जन्यात्मबोधविरोधान्नेति परिहरति नास्तीति· ननु तथापि सद्द्वयादि प्रपंचो वा ह्यप्रपंचवन्नमिथ्येति शंकित्वा दृष्टांतात् सिध्या
परिहरति पूर्णेति· तदज्ञानमप्रबाधितत्वात् ब्रह्मवत्सत्यमिति तन्मूलकं जगदपि न मिथ्येति तत्राह बोधइति· बोधे ब्रह्मात्मैक्यसाक्षा
त्कारे समुत्पन्ने सत्यज्ञानं जगन्नदीपे सति तमइवेत्यर्थः तथा च ज्ञानबाध्यमज्ञानं मिथ्येति भावः ननु ज्ञानाज्ञानयोरेव विरोधः ततः स्वस्व
रूपाधिष्ठानावरकाज्ञानस्य तत्त्वबोधान्निवृत्तावपि संसारनिवृत्तिः कथमित्याशंक्योपादाननिवृत्त्योपादेयस्यापि निवृत्तिरिति त्वमा

योऽहमद्वयवस्तुवस्तद्रूपेऽदृढनिश्चयः प्राप्य चानंदमात्मानं सोऽहमद्वयविग्रहः ४५ नास्ति ब्रह्म सदानंदमिति मे दुर्मतिः स्थिता क्व
गतास्मान जानामि यदाहं तद्वपुः स्थितः ४६ पूर्णानंदाद्वये तत्त्वे मेवादि जगदाकृतिः बोधे बोधकृते वासीद्बोधः क्व गतोऽधुना ४७
संसाररोगसंग्रस्तो दुःखराशिरिवापरः आत्मबोधसमुन्मेषादानंदाब्धिरहो स्थितः ४८ योऽहमल्पेऽपि विषये रागवानति
विह्वलः आनंदात्मनि संप्राप्ते मे रागः क्व गतोऽधुना ४९ यस्य मे जगतां कर्तुः कार्यैरपहृतात्मनः आविर्भूतपरानंद आ
त्मा प्राप्तः श्रुतेर्बलात् ५० परमेष्ठी शिवो विष्णुर्विनासि त्वां मम इदानीं त्वामहं प्राप्तो न त्यजामि कदाचन ५१ त्वां विना
निःस्वरूपोऽहं मा विना त्वं कथं स्थितः दिष्ट्येदानीं मया लब्धो योऽसि सोऽसि नमोऽस्तु ते ५२

शेषपदनाशार्थेव्यभिप्रेत्याह संसारेति· आनंदाब्धिरिति· विशेषणफलमाह योऽहमिति· रागमूलाविद्याहतेः निरतिशयसुखे सर्वेषां सुखाना
मंतर्भावात् तस्मिन् सर्वसुखस्यापि प्राप्तत्वात् रागाभावात् प्रवृत्तिनिवृत्तिरित्यर्थः नन्वज्ञानस्यानंदात्मावरकत्वमनुपपन्नं तस्य भ्रमे सत्यप्यज्ञाने सु
खस्य भानाद् अन्यथा सुखमहमस्वाप्समिति परामर्शो न स्यादित्याशंक्य कार्याकारेण परिणतमज्ञानं सुखावभासप्रतिबंधकं न स्वरूपेणेत्याह
यस्येति· ननु आत्मा तावदपरोक्षः तदभिन्नं च ब्रह्माप्यपरोक्षं आत्मा च भाति तथा च सति ब्रह्मसाक्षात्कारकथं संसारइत्याशंक्यात्मज्ञा
ने किमहं कर्तेत्येव ज्ञानं अथवा शुद्धस्वरूपसाक्षात्कारं नाद्यः तस्यानात्मज्ञानत्वात् न द्वितीयः विचारसाध्य कतदसिद्धेरित्याह परमेष्ठीसी

श्रीबोधसिंधुबंधुस्तोत्रारभ संविन्मेति ।।०।।
श्री. सिं. प्र. ८२

ति· ननुब्रह्मणोऽद्वितीयसद्भावात् संविन्नेति· ब्रह्मणः सद्रूपत्वात् तद्धि ब्रह्मसत्यम्।
संगात तत्स्यागेन पुरुषेण इत्यर्थः ब्रह्मणोपि प्रपंचक भेदे ज्ञाते ब्रह्मसंगात तम्।
८२

नमस्कार्यत्वेवंधनिवृत्त्युपकारकत्वेदेत्वमाह देहइति· ननुबद्धमुक्तयोः कोविशेषः इत्याशंक्याह विशुद्धइति बद्धस्यहिमालिन्यतालोकेप्र
सिद्धानयात्मनस्तादीनताचमुक्तेतुनहेयमीयंलोकोदेवमिद्धमिति विशुद्धोमलरहितोद्वितीयाभावात् पूर्णोहिभोगकालाद्यपिशर्णानमइति
त्रिविधपरिच्छेदशून्यइत्यर्थः एतेदेवनिरतिशयमहत्त्वंस्पष्टयति ब्रह्मस्वरूपेणेति· ननुसाक्षात्कारसाधनीनश्रवणशुद्धिहेतूनावेदानुवचना
दीनांकार्थलिंगेनानुष्ठितत्वमाह तत्वमहीति· ज्ञानशाद्युः समूहवचनेनेनसंपूर्णोवेदइत्यर्थः उपलक्षणमेतत् अष्टाचत्वारिंशत्संस्का
रनित्यानित्यवस्तुविवेकाद्यंतरंगसाधनमपिसंपन्नमित्यर्थः वेदांतवाक्यविचारजन्यसाक्षात्कारादेवमुक्तिर्नकर्मसहितादितिसंन्यासस्या
प्यंगत्वसूचनायाह इदानीमिति· ततश्चवेदांतश्रवः विचारजन्यसाक्षात्कारइत्यर्थः नन्वानंदरूपत्वमात्मनोनयुज्यनेतद्रूपेणाप्रती

॥०॥ देहाभिमाननिगडैर्विहीनोबोधात्मतत्त्वैः विरतेदर्शनादेवत्रुटितंबंधनंतणात् ५३ विशुद्धोस्मिविमुक्तोस्मिपूर्णोस्मिपूर्णतमाकृतिः
ब्रह्मस्वरूपेणतमात्मानंसंतुब्रह्मांडकोटयः ५४ तत्वमादिवचोजालमाहत्तममसत्क्रतः इदानींतन्मयोदेवपूर्णानंदोव्यवा
स्थितः ५५ ननुपरिपूर्णानंदस्वभावश्चेदात्माकथंसंसारावस्थायांनस्फुरति नत्वपरमप्रेमास्पदतयात्मनःस्फूर्त्तिरेवानंदस्व
रूपस्यस्फूर्त्तिरितिवाच्यं तादृगभिमानाभावात् नहिमोक्षावस्थायांयादृगानंदस्वरूपत्वमात्मनः श्रूयतेएतस्यैवानंदस्यान्या
निभूतानिमात्रामुपजीवंतीत्यादिश्रुतेः तादृगानंदात्माभिमानः कस्यचिदप्यस्ति आनंदंब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितमिति

यमानत्वात्सुखादिवदितिशंकते नन्विति· यद्यपिब्रह्मयानंदरूपेणैवतस्यात्तानविषयत्वादित्यत्रप्रागेवानंदांशस्याज्ञानावृतत्वमस्फु
रणकारणमुक्तंतथापितदेवावरकाज्ञानादिविषयकविचारेणातिनिरंतरंदृढीकर्तुंसूत्रेणनिरवनतन्यायेनावार्थः प्रवर्त्ततइतिनदोषः
मानभूवंकिंतुभूयासमेवेतितावदिच्छाविषयत्वेनात्माप्रतीयतेनतदेववस्तुवत्स्फुरणंतदतिरिक्तसुखाभावादितिततोऽप्रतीयमानत्व
मसिद्धमित्यनूद्यदूषयति नचेति· किंवस्ततोनिरतिशयानंदरूपआत्मापरमप्रेमास्पदत्वेनभासतइत्युच्यतेउतनिरतिशयानंदोहमस्मी
त्यभिमन्यतेवाआद्यमंगीकृत्यद्वितीयंदूषयति तादृगिति· ननुसुखमहस्वाप्समितिपरामर्शादभिमन्यतएवसुखरूपतामिति तत्राह
नहीति· ननुसुखंसुखमेयज्ञासतेतदपिनिरतिशयमेवनहितिस्मआत्मसुखेविकश्चिदतिशयोस्तितत्राह आनंदमिति· आनंदोहमित्यभि

मविवत्तद्रूप्र

मानदृष्टान्तविरोधेनसुखप्रसिकालेऽभावात् अस्मत्तनमिसिद्धस्वप्रत्यक्षसुखं ॥०॥

सि॰ मु॰ ८३

नन्वानंदात्मनोऽप्रतीतिरनानंदात्मकत्वादिति न किंतु प्रतिबद्धत्वादिति शंकते संसारेति॰ नोन्योतऽति॰ अतः परमात्मनः अनेन जीवेनात्मने तिसामानाधिकरण्यात् जीवब्रह्मणोरेकत्वमित्यर्थः नन्वनेन जीवेनवाविर्भूते ब्रह्मणि किं तु चिन्मात्रेनिर्विभागेऽतिप्रयोग वावेदि नमिति तत्राह नवेति ततश्चानंदरूपत्वप्रतिबंधः किं वास्तवो वाऽज्ञाननिबंधनमात्रेण प्रतिभासनात् कल्पितो वायमनूद्य दूषयति॰ यदीति॰ द्वितीयमाशंक्यपराचष्टे नचेत्यादिनाऽऽत्मन्यनवधानमात्रेप्रतिबंधऽति संबंधः अनवधानमुपपादयति केवलमित्यादिना ईश्वरं आत्मानमिति सामानाधिकरण्यादैक्यमीतितं तत्त्वमलभमानस्येत्यर्थः पेक्यदर्शनयोग्यतामाह अतिसन्निहितेति॰ साक्षाद

संसारावस्थायां प्रतिबंधसत्वात् भासमानमप्यानंदरूपत्वं नाभिमन्यत ऽतिचेत् कस्तर्हि प्रतिबंधः अज्ञानं तत्कार्यं वाऽऽद्येजी।
वस्यपरस्य वातोऽमः तस्य सर्वत्तस्य निरवद्यस्य तदभावात् नाद्यः तस्यपरेणाभेदात् नान्योतोस्ति द्रष्टाऽत्यादि अनेन जीवेनात्मनात।
त्वमसि अयमात्मा ब्रह्मेत्यादिश्रुतिभ्यः नवकल्पनामात्रेणैव जीवस्याप्यज्ञानं नवस्तुतोऽस्तीति वाच्यं परस्मिन्नपि प्रसंगात् नचवि
मात्रेनिष्टमज्ञाने तत्सर्वात्मनाप्रतिबध्नात्येवेति वाच्यं यदि संसारावस्थायामप्रतिबद्धः आनंदो नास्येव कस्यप्राप्यात् र्हि बंधनिवृ
त्रिः स्यात् नहि संसारिप्राप्यासंसारनिवृत्तिसंभवतिः न चाप्रतिबद्धः एवात्मानंदः संसारावस्थायामप्यस्त्येव केवलमज्ञाना।
समुद्भूतहेतोः यातिशय्यादिविषयवि विविषयस्य तत् दर्शनाद्विलालसामानस्य तद्दर्शनवेलायामप्यंतभावनासमन्या
पितविषयवदिशाकृष्ट हृदयस्य परमप्रियतमं जगदीश्वरं सर्वांग आतेप्रोततयाति सन्निहितं मप्यात्मानमीति तत्त्वमल तम २
भमानस्य स्वग्रीवास्थग्रैवेयकाद्यनवधानवदनवधानमात्रमात्मनि प्रतिबंधो नवस्तुतः प्रतिबंधोस्तीति वाच्यम् ॥१०॥

परोक्षात् ब्रह्मेति श्रुतेरित्यर्थः परमेति॰ यो वै भूमा तत्सुखमिति ब्रह्मणः सुखश्रवणादित्यर्थः आनंदात्मनो जगत्कारणत्वादीश्वर ८३
त्वमाह ईश्वरमिति॰ आनंदाद्ध्येवेति श्रुतेरित्यर्थः उपादानत्वमाह अतऽति उक्तविषयाएव विषेतेन विषयस्तदधीनस्येत्यर्थः नतु
विषमयोरेव यादिनासास्पतेपवं विवेकेन विषयत्यागो प्रस्नतेऽस्याशंक्य विवेकएव नास्तीत्याह तद्दर्शनेति॰ ननु तथापि वैषयिकसुख
स्य क्षणिकत्वादेव ततो विरक्ताभवितव्यमिति नेत्याह तद्दर्शनेति॰ तथा च विषयदर्शनेनैव सर्वस्यापुषोऽयामत्वात् आत्मनो नवधानंपु

अनाद्यविमावः तेनसहाद्वैते प्रामनिद्धः सादिसहृपादिदर्शनेनैवस्वप्रतिबंधप्रतिभावः

द्वैतेति २

तद्दर्शनरूपस्येत्यादिग्रंथेदस्योक्तत्वादित्यंतोग्रंथः स्पष्टार्थः उक्तत्वात्तस्येतोलिङ्दृष्टा इत्यादावित्यर्थः ततोजीवस्यसर्वज्ञस्यग्णाभिन्नस्यभ्रमबीजाज्ञानाभा
वात् तत्कर्तृत्वेहेतदर्शनंनयुज्यतेत्यर्थः ननुयथाविंवप्रतिविंवयोस्तदेवेदंमुखमितिप्रत्यभिज्ञयैकत्वेपिश्यामत्वेप्रतिविंवएव श्वेदात्तत्वंविंवएव।
उपाधेः प्रतिविंवपक्षपातित्वनियमात् तद्वदज्ञानोपाधिकदृष्टेतदर्शनंजीवस्यैवनपरस्येतिशंकापराह नचाभेदेपीति दृष्टांतेविंवप्रतिविंवभाव।
स्यनियामकत्वेपिप्रकृतेतद्व्यवस्थापकस्याप्रयोजकत्वात् नत्रसंभवतीतिवैषम्येनोत्तरमाह वैषम्यादिति वैषम्यंस्पष्टयति नत्रहीत्यादिना इदृशं
दृष्टांतिकेहेतदर्शनेसति तत्प्रस्तुपस्थापितस्याज्ञानतत्कार्यस्यप्रतिविंबोपाधितयातदनुप्रवेशेनतदुपरागेनप्रतिविंबादिकल्पनात्तस्यांवस
हेत तदर्शनरूपस्यप्रतिवंधस्याप्रतिसामर्थ्यात् तथाहि कोसौहेतद्द्रष्टाकिंपरमात्माकिंवाजीवः किंवापरः कश्चित्राद्यः तस्यसर्वज्ञस्य।
भ्रमबीजाज्ञानाभावेनहेतदर्शनानुपपत्तेः यस्याज्ञानंभ्रमस्तस्यभ्रांतः सम्यकचवेतिसूत्रतिन्यायात् अज्ञानमिथ्याज्ञानसम्यक्ज्ञानानांसमा
नाधिकरणत्वनियमेनाविद्यावतएवतत्संभवात् अस्तुतर्हिजीवस्याविद्यावतोहेतद्रष्टृत्वंनतस्यपरेणाभेदस्योक्तत्वात् नचाभेदेपि।
विंवप्रतिविंवव्यवस्थयासर्वज्ञत्वहेतद्रष्टृत्वयोरुपपत्तिरितिवाच्यंवैषम्यात् तत्रहिपूर्वसिद्धउपाधौविंवप्रतिविंवभावानंतरंप्रतीय।
मानयोर्मलिनत्वस्वच्छत्वयोर्व्यवस्थयोपपत्तिर्युक्ताइदंतुहेतदृष्टस्थापितहेतस्योपाधितयातदनुप्रवेशेनविंवप्रतिविंवभावकल्पना
यांततःपूर्वंद्रष्टृव्यवस्थापकानुपपत्तेः नचानादिसिद्धाज्ञानप्रतिविंवस्याप्यनादितयाततःपूर्वमिति पर्यनुयोगानुपपत्तिरितिवाच्यं
अनादिसिद्धाज्ञानद्वैतेपि अनादिसिद्धस्यैववक्तव्यत्वात् नचासौवक्तुंशक्यः नचसास्त्येवतथातस्यसर्वज्ञस्यस्वाविद्यायाविरहेणात
त द्रष्टृत्वानुपपत्तेः नचसर्वज्ञस्याप्यन्याविद्याद्रष्टृत्वेनाविरोधः स्वाभिन्नाविद्याद्रष्टृत्वेनपरमात्मनोभ्रांतत्वप्रसंगात् ॥१०॥
यांप्रतिविंवात्माजीवोद्रष्टेत्यस्योन्याश्रयादयंप्रकारोनोपपद्यतइत्यर्थः ननुउपाधिप्रतिविंवयोरनादित्वात्तदुत्तरकालंद्रष्टृत्वव्यवस्थेत्यनुपप
त्तिमितिनेत्याह नचेति तथाचनान्योन्याश्रयइतिभावः भवत्वेवंद्रष्टाजीवः सादिरनादिर्वासादिश्चेत्तत्राह अनादिसिद्धेति तथाचजीवोद्र
ष्टानस्यादित्यर्थः ननुजीवादन्यः परएवानादिसिद्धोद्रष्टास्तुतत्राह नचेति अनादिसिद्धोद्रष्टावक्तुंनशक्यतइत्यर्थः ननुकथंद्रष्टृभावःसा
क्षिणएवसत्वादितिनेत्याह नचेति साक्षीकिंपरोवाजीवोवाआद्यंदूषयति तस्येति साक्षीकिंस्वाविद्यादिप्रपश्यति जीवाविद्यादिवानाद्यं
इत्याह सर्वज्ञस्येति द्वितीयंदूषयति नचेति तर्हिजीवब्रह्मणोर्भेदः किंवास्तवः उतावास्तवः नाद्यइत्याह स्वभिन्नेति स्वभिन्नस्ययाविद्यातद्

नहि ब्रह्मणो भ्रांतत्वपरिहारायवास्तवो जीवपरमात्मनोर्भेदोस्त्वित्याह नान्योतोस्तीति ननुपरमात्मैवद्वैतद्रष्टास्तु नचसर्वज्ञत्वविरोधः सर्व
सि॰ ज्ञत्वं हि नाविद्यानिवर्तकप्रमाणजन्यज्ञानाश्रयत्वं किंतु स्वरूपचैतन्येन स्वाध्यस्तसर्वजगदवभासकत्वं नच स्वरूपचैतन्यमविद्याविरोधि।
मु॰ तस्य तत्साधकत्वात् तथाच परमात्मैवद्वैतद्रष्टेति नेत्याह नचेत्यादिना अविद्याया अपीति। अपिशब्दोऽविद्याकार्यसंग्रहार्थः निरंजनशब्दे
८५ नाविद्याकार्यस्य निषिद्धत्वात् इति अविद्यादिनिषेधवाक्यस्यान्यविषयत्वेनाविद्यादिनिषेधकत्वमित्याशंक्याविद्याशब्दस्याविद्या
मात्रशक्तस्य वास्तवाविद्यापरत्वे लक्षणापत्तेर्मैवमित्याह नचेत्यादिना किंच वस्तुभूताविद्याप्रसिद्धा नवा आद्ये द्वैतापत्तिर्निषेधानुपपत्ति
श्च प्रत्यक्षवत् द्वितीयेऽप्रसिद्धत्वादेव निषेधानुपपत्तिरित्याह वस्तुभूतेति। जीवोनादिरितिपदं प्रत्याह जीवस्य चेति। विपक्षे भावत्वे सत्यना

नान्योतोस्तिद्रष्टेति शास्त्रविरोधाच्च नचसर्वज्ञत्वंनामस्वरूपचैतन्येनस्वाध्यस्तसकलभासकत्वं तच्चाविद्यावत्त्वेपि नविरुध्यते।
इतिवाच्यं निरवद्यं निरंजनमिति श्रुत्याऽविद्याया अपि तत्र निषिद्धत्वात् नचवस्तुभूताविद्यायाः निषेधः नतुकल्पिताया अपीति
वाच्यं साधारणनिषेधात् वस्तुभूताविद्याऽप्रसिद्धेश्च जीवस्य चाविद्योत्तरभावितयानादित्वानुपपत्तेः अन्यथाविद्यानिवृत्त्या
पि जीवभावो न निवर्तेत ननु तृतीयः जीवपरमात्मव्यतिरिक्तस्य सर्वस्यैव जडत्वेन द्रष्टृत्वानुपपत्तेः नचोभयानुगतचित्सामान्य
स्यैव द्रष्टृत्वमिति वाच्यं तथाच सत्यविद्याया अपि तत्रैव वक्तव्यतया जीवस्य निरविद्यस्याभ्रान्तस्य परमात्मवत् नित्यमुक्तत्वस ॥१०॥

दित्वात् जीवभावस्य सांसारिकत्वस्यानिवृत्त्यापत्त्यानिर्मोक्षः स्यादिति बाधकमाह अन्यथेति। अथापरः कश्चित् द्रष्टेतिपदं प्रत्याह ८५
ननु तृतीय इत्यादिना सर्वज्ञत्वाद्यापत्तिरित्यंतो निगदव्याख्यातो ग्रंथः किंच जीवपरमात्मनोरनुगतं चैतन्यं द्रष्टेतिपक्षे अन्योन्याश्रयदूष
णं तत्राह उपाधीति। तृतीयप्रकारे चैतन्यस्य द्रष्टृत्वे तद्द्रष्टुरुपाधिशक्तिर्ज्ञानानादिसिद्धिस्तत् सिद्धौ च तत्त्रिरूपस्य विवक्षितविवा
द्यब्रह्मजीवप्रकारद्वयापेक्षितत्त तृतीयप्रकारसिद्धिरित्यन्योन्याश्रयादयं पक्षो न साधीयानित्यर्थः ननु प्रसक्तस्य ज्ञानपूर्वकत्वादित्यत्रा
विद्याप्रद्रष्टेवाविद्याद्रष्टेत्यर्थाद्युक्तं तथा देव भावानन द्रष्टेति तथाचाद्वैतद्रष्टुरुक्तत्वात्प्रसंगः पुनर्नयुज्यते इति पदं दूषयति ॥१०॥

नचेति॰ ननु कोऽहं तद् ब्रूहीति प्रश्नोऽविद्याद्रष्टृत्वस्वरूपाज्ञानेनोपपद्यते प्रश्नविषयाज्ञाने तद्विषयकशब्दप्रयोगायोगादित्यत आह नचेति॰ अज्ञा
तपदार्थः पृष्टव्यः तं चैतद्विपरीतवाक्येन द्रढयति अन्यथेति॰ संसर्गज्ञानं न वाक्यप्रयोगहेतुः डित्थडवित्थादिशब्दप्रयोगव्यभिचारात पदज्ञानस्यैव शु
कवद्वाक्यादिषु कारणत्वेन क्लृप्तस्यैतत्रापि तस्यैव वाक्योच्चारणहेतुत्वोपपत्तेः संसर्गप्रतीतेः कारणत्वे प्रमाणाभावादिति नचवाच्यमित्यप्र
तितायां हेतुमाह लोभशब्दवदिति॰ नन्वबाधितस्य लोकप्रसिद्धस्य वाक्योच्चारणहेतुत्वस्य संसर्गप्रतीतौ कथमपह्नवः क्रियत इत्यत
आह संसर्गज्ञानस्य चेति॰ ननु वेदप्रामाण्यं न संसर्गज्ञानमन्तरेण शुकवालादिवाक्यपि तन्नास्तीति तत्र कथं तस्य प्रामाण्यप्रयोजकत्वेति मैवं
नवाविद्यानंशी कोरतद्विषयकप्रश्नादेषानुपपत्यात्तैवेच प्रष्टुरात्मस्वर्वान्याविद्याद्रष्टृत्वेऽपि तमिति वाच्यं तस्यैव ममाविद्याद्रष्टुः स्वरूप
स्येदानींत्वयानत्वनिर्णयार्थं वक्तव्यत्वात नचपत्तं स्वात्मस्वरूपमपि न जानासि अयमहमिदं पृच्छामीति तस्य तव प्रश्नपूर्वकशा
स्त्रादिति वाच्यं प्रश्नविषयाज्ञानेन तस्य प्रश्नोपपत्तेः अन्यथा पृष्टव्यार्थज्ञानाज्ञानविकल्पेन प्रश्नाभावेनापृष्टः कस्यचित
ब्रूयान्नचान्यायेन पृच्छतः जानन्नपि हि मेधावी जडवल्लोक आचरेत् इति न्यायेन स्वयं वक्तुमशक्यतया सर्वशास्त्रमारण्यरु
दितं स्यात नच प्रश्नविषयापरिज्ञाने कथं तद्विषयकशब्दरचनानर्हि संसर्गमज्ञात्वा शब्दरचनानामेतिप्रसिद्धिरिति वाच्यं लो
भशब्दवत सार्थकस्यापि शब्दस्य तत्स्वरूपज्ञानादेव शब्दरचनोपपत्तेः सर्वत्र शब्दस्वरूपज्ञानस्यैव शब्दरचनाहेतुत्वात संसर्गज्ञा
नस्य च शब्दरचनाहेतुत्वेन प्रसिद्धाभावात्तस्य प्रमाणशब्दप्रामाण्यप्रयोजकतयान्यथासिद्धेः नचदेहादीनां बुद्धिपर्यन्तानामहंप्रत्य
यालम्बनीभूतानामितरानात्मव्याहृतत्वतया प्रतीयमानानां मध्ये अन्यतमं तत्समुदायो वा न च स्वरूपमिति वाच्यम् ॥१०॥
नैयायिकमतेनास्य परिहारस्योक्तत्वात तन्मते वेश्वरज्ञानस्य वेदे शुकादिवाक्ये च प्रामाण्यप्रयोजकस्य सत्त्वात अस्माकं पुनर्डित्थडवित्थादिशब्दप्रामा
ण्यवदभावेन व्यभिचारा लोकप्रसिद्धेरपरंपरावदनादरणीयत्वादिति तस्मादज्ञानेऽपि प्रश्नसंभवादविद्याद्रष्टुर्मम स्वरूपं तत्त्वनिर्णयार्थं त्व
या वाच्यमिति स्थितं तत्र शिष्यहृदि वर्तमानं द्रष्टृस्वरूपनिर्णयार्थं शरीरादीनां द्रष्टृस्वरूपत्वमाशंक्य परिहरति नचदेहादीनामिति आदिशब्देने
न्द्रियं मनश्च संगृह्यते तेषां द्रष्टृस्वरूपत्वे हेतुमाह अहंप्रत्ययेति॰ अहंप्रत्ययेत्यादिविशेषणफलमाह इतरेति अन्यतमेमिति शरीरमेव वा
मन एव वा बुद्धिरेव वा इत्यर्थः एतेषां समुदायो वा द्रष्टृस्वरूपमिति पक्षान्तरमाह समुदायो वेति शरीरेन्द्रियाद्यपेतया निस्थूलत्वात्प्रथमत्वे
म२

वेदान्तसं॰ [illegible] ॥१०॥

